* श्रीगणेशायनमः *

अथमार्गशीर्षमाहात्म्यारम्भः

प्रथमोऽध्यायः

गोपीकृतमार्गशीर्षस्नानकथनम्

सूत उवाच

देवकीनन्दनं कृष्णं जगदानन्दकारकम् । भुक्तिमुक्तिप्रदं वन्दे माधवं भक्तवत्सलम् ॥
श्वेतद्वीपे सुखासीनं देवदेवं रमापतिम् । चतुर्वक्त्रो नमस्कृत्य पप्रच्छ पितरन्तदा ॥

ब्रह्मोवाच

हृषीकेश! जगद्धातः! पुण्यश्रवणकीर्तन !। पृष्टं यद्ब्रूहि देवेश! सर्वज्ञ सकलेश्वर! ॥३॥
मासानां मार्गशीर्षोऽहमित्युक्तं भवता पुरा ।
तस्य मासस्य माहात्म्यं ज्ञातुमिच्छामि तत्त्वतः ॥ ४ ॥
को देवस्तस्यकिंदानंकथं स्नानं विधिश्च कः । पुरुषैस्तत्रकिंकार्यंभोक्तव्यंकिंरमापते!
वक्तव्यंकिंतथापूजाध्यानमन्त्रादिकञ्चयत् । तत्र यत्क्रियते कर्म तत्सर्वम्ब्रूहिमेऽच्युत

श्रीभगवानुवाच

साधुपृष्टं त्वया ब्रह्मन्सर्वलोकोपकारिणा । यस्मिन्कृतेकृतं सर्वमिष्टापूर्तादिकम्भवेत्
सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् । तत्फलं समवाप्नो मार्गशीर्षे कृते सुत !॥८
तुलापुरुषदानाद्यैर्यत्फलं लभते नरः । तत्फलम्प्राप्यते पुत्र! माहात्म्यश्रवणात्किल ॥
यज्ञाध्ययनदानाद्यैः सर्वतीर्थावगाहनैः । सन्न्यासेन च योगेननाऽहंवश्योऽभवंनृणाम्
स्नानेन दानेन च पूजनेन ध्यानेन मौनेन जपादिभिश्च ।

वश्यो यथा मार्गशिरे च मासि तथा न चान्येषु च गुह्यमुक्तम् ॥ ११ ॥
अन्यैर्धर्मादिभिः कृत्वा गोपितं मार्गशीर्षकम् ।
मत्प्राप्तेः कारणं मत्वा देवैः स्वर्गनिवासिभिः ॥ १२ ॥
ये केचित्पुण्यकर्माणो मम भक्तिपरायणाः । तेषामवश्यं कर्तव्यो मार्गशीर्षोमदापनः
मार्गशीर्षं न कुर्वन्ति ये नराभारताऽजिरे । पापरूपाश्च ते ज्ञेयाःकलिकालविमोहिताः
अष्टस्वपि च मासेषु यत्फलं लभते नरः । तत्फलं प्राप्यते वत्स माघेमकरगे रवौ ॥
माघाच्छतगुणं पुण्यं वैशाखेमासिलभ्यते । तस्मात्सहस्रगुणितं तुलासंस्थेदिवाकरे
तस्मात्कोटिगुणं पुण्यं वृश्चिकस्थे दिवाकरे ।
मार्गशीर्षोऽधिकस्तस्मात्सर्वदा च मम प्रियः ॥ १७ ॥
उषस्युत्थाय यो मर्त्यः स्नानं विधिवदाचरेत् ।
तुष्टोऽहं तस्य यच्छामि स्वात्मानमपि पुत्रक !॥ १८ ॥
अत्राप्युदाहरन्तीदं शृणुपुत्र! कथानकम् । नन्दगोपोमहात्मावैख्यातोयोभूतलेऽभवत्
तस्य वै गोकुले रम्ये गोपकन्या सहस्रशः । तासांचित्तञ्चमद्रूपे लग्नमासीत्पुराऽनघ
तासां बुद्धिर्मयादत्ता मार्गशीर्षाऽवगाहने । ततस्ताभिःकृतंस्नानं प्रातःकालेयथाविधि
पूजा कृता हविष्यान्नं भुक्तं ताभिः कृता नतिः ।
एवं कृतेन विधिना प्रसन्नोऽहं ततोऽनघ !॥ २२ ॥
दत्तोमयाऽऽत्माहितासांतुष्टेनवैवरोकिल । तस्मान्नरैस्तुकर्तव्योमार्गशीर्षोयथाविधि
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे गोपीकृतमार्गशार्षस्नानफलकथनं
नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

त्रिपुण्ड्रधारणविधिकथनम्

ब्रह्मोवाच

त्वयोक्तो विधिसंयुक्तोमार्गशीर्षोमदापनः । को विधिस्तस्य देवेश सर्वंमेब्रूहिकेशव

श्रीभगवानुवाच

रात्रावन्तेसमुत्थायउपस्पृश्ययथाविधि । नमस्कृत्यगुरुंस्वीयंसंस्मरेन्मामतन्द्रितः
सहस्रनामभिर्भक्त्याकीर्तयेद्वाग्यतःशुचिः । बहिर्ग्रामात्समुत्सृज्यमलमूत्रं यथाविधि
शौचं कृत्वा यथान्यायमाचम्य प्रयतःशुचिः । दन्तधावनपूर्वञ्च स्नानंकृत्वायथाविधि
आदाय तुलसीमूलमृदं तत्पत्रसंयुताम् । मूलमन्त्रेणाऽभिमन्त्र्यगायत्र्या वा महामते
मन्त्रेणैवाऽनुलिप्ताङ्गः स्नायाद्प्स्वघमर्षणम् । अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंविधायते
तीर्थंप्रकल्पयेद्विद्वान्मन्त्रेणाऽनेन मन्त्रवित् । ॐ नमोनारायणायेतिमूलमन्त्रउदाहृतः
दर्भपाणिस्तु विधिना आचान्तः पुरतः शुचिः । चतुर्हस्तसमायुक्तंचतुरस्रं समन्ततः
प्रकल्प्याऽऽवाहयेद्गङ्गामेभिर्मन्त्रैर्विचक्षणः ॥ ८ ॥
विष्णुपादप्रसूताऽसि वैष्णवी विष्णुदेवता ।
त्राहि नस्त्वमघादस्मादाजन्ममरणान्तिकात् ॥ ९ ॥
तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जाह्नवि !॥ १०॥
नन्दिनीत्येव ते नामदेवेषु नलिनीति च । दक्षपुत्री च विहगा विश्वगायोगिनां मता
विद्याधरी सुप्रसन्ना तथालोकप्रसादिनी । क्षेमा चजाह्नवीचैवशान्ताशान्तिप्रदायिनी
एतानि पुण्यनामानि स्नानकाले सदापठेत् । सदा सन्निहितातत्र गङ्गात्रपथगामिनी
सप्तवाराभिजप्तेन करसम्पुटयोजितम् । मूर्ध्नाकृताञ्जलिर्भूयस्त्रिचतुः पञ्च सप्त वा ॥
स्नानं कुर्यान्मृदा तद्वदामन्त्र्याऽनुविधानतः ॥ १४ ॥

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । मृत्तिके! हर मे पापंयन्मयादुष्कृतंकृतम्
उद्धृताऽसि वराहेण कृष्णेन शतबाहुना । नमस्ते सर्वभूतानांप्रभवाऽरणि! सुव्रते!॥
एवं स्नात्वा ततः पश्चादाचम्य च विधानतः । उत्थायवाससीशुक्ले कूलेवैपरिधायच
आचम्य तर्पयेद्देवान्पितृंश्चैवऋषींस्तथा । निष्पीड्यवस्त्रमाचम्यधौतवस्त्रेणवेष्टितः
विमलां मृत्तिकां रम्यामादाय द्विजसत्तम !।
मन्त्रेणैवाऽभिमन्त्र्याऽथ ललाटादिषु वैष्णवः ॥
धारयेदूर्ध्वपुण्ड्राणि यथासङ्ख्यमतन्द्रितः ॥ १६ ॥
ब्रह्मन्द्वादशपुण्ड्राणिब्राह्मणःसततंवहेत् । चत्वारिभूभृतांपुत्र! पुण्ड्राणिद्वेविशांस्मृते
एकं पुण्ड्रं च नारीणां शूद्राणां च विधीयते ॥ २० ॥
ललाट उदरेकैव वक्षो वै कण्ठकूबरे । कुक्ष्योर्बाह्वोः कर्णयोश्चपृष्ठे त्रिके च वै शिरः
तिलका द्वादश प्रोक्ता ब्राह्मणस्यसदाऽनघ !॥ २१ ॥
ललाटे हृदि बाह्वोश्च क्षात्रः पुण्ड्राणिधारयेत् । ललाटेहृदयेवैश्योभालेवैशूद्रयोषिताम्
ललाटे केशवं ध्यानेन्नारायणमाथोदरे । वक्षःस्थले माधवञ्च गोविन्दं कण्ठकूबरे
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् । त्रिविक्रमं कर्णमूलेवामनंवामपार्श्वके
श्रीधरं वामबाहौ च हृषीकेशञ्च कर्णके । पृष्ठे तु पद्मनाभः स्यात्त्रिकेदामोदरंन्यसेत्
तत्प्रक्षालनतोयेन वासुदेवं तु मूर्धनि । एवं कार्यं ब्राह्मणस्यक्षत्रियस्योपधारयेत्
ललाटे केशवं ध्यायेद्धृदये माधवं तथा । बाह्वोश्च उभयोर्वत्स ! स्मरेद्वै मधुसूदनम्
क्षत्रियस्य विधिः प्रोक्तो वैश्यकृत्यंनिशामय । ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा
योषिच्छूद्रौ स्मरेताञ्च केशवं भालदेशके । अनेन विधिना कुर्यात्पुण्ड्राणि ममतुष्टये
श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरंतथा । श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरं शुभम्
एकान्तिनोमहाभागाः सर्वलोकहितेरताः । साऽन्तरालंप्रकुर्वन्तिपुण्ड्रंहरिपदाकृतिम्
मध्ये छिद्रेणसंयुक्तमेतद्धिहरिमन्दिरम् । ऊर्ध्वंसौम्यमृजुं सूक्ष्मंसुपार्श्वंसुमनोहरम्
निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः ।
स हि तत्र स्थितं लक्ष्म्या सह माञ्च व्यपोहति ॥ ३३ ॥

अच्छिद्रमूर्ध्वपुण्ड्रं तु ये कुर्वन्ति द्विजाधमाः । तैर्ललाटे शुनः पादंनिक्षिप्तंवैन संशयः
तस्माच्छिद्रान्वितं पुण्ड्रं महच्छिद्रं शुभान्वितम् ।
धारयेद् ब्राह्मणो नित्यं हरिसालोक्यसिद्धये ॥ ३५ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे त्रिपुण्ड्रधारणविधिकथनं
नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

गोपीचन्दनादिशङ्खचक्राद्यायुधधारणतत्तन्मुद्राविधिधारणप्रकारकथनम्

ब्रह्मोवाच

पुण्ड्रं कतिविधं कार्यं प्रब्रूहि मम केशव !। पुण्ड्राणां श्रवणेऽतीव कौतुकंममजायते

श्रीभगवानुवाच

शृणु पुत्रप्रवक्ष्यामिपुण्ड्रञ्चत्रिविधंस्मृतम् । तुलसीमृत्स्नयासार्धंश्रीगोपीचन्दनेनच
हरिचन्दनतः कार्यं पुण्ड्रं तत्र विचक्षणैः । श्रीकृष्णतुलसीमूलमृदमादाय भक्तिमान्
धारयेदूर्ध्वपुण्ड्राणि हरिस्तत्र प्रसीदति ॥ ३ ॥
गोपीचन्दनमाहात्म्यं निबोध गदतो मम ॥ ४ ॥
यो मृत्तिकां द्वारवतीसमुद्भवां करे समादाय ललाटपट्टके ।
करोति नित्यं नर ऊर्ध्वपुण्ड्रं क्रियाफलं कोटिगुणं तदा भवेत् ॥ ५ ॥
क्रियाविहीनं यदि मन्त्रहीनं श्रद्धाविहीनं यदि कालवर्जितम् ।
कृत्वा ललाटे यदि गोपिचन्दनं प्राप्नोति तत्कर्मफलं सदाऽव्ययम् ॥ ६ ॥
गोपीचन्दनसम्भवं सुरुचिरं पुण्ड्रं ललाटे द्विजो,
नित्यं धारयते यदि प्रतिदिनं रात्रौ दिवा सर्वदा ।

यत्पुण्यं कुरुजाङ्गले रविग्रहे माघे प्रयागे तथा,
तत्प्राप्नोति ततोऽधिकं मम गृहे सन्तिष्ठते देववत् ॥ ७ ॥
यस्मिन्गृहे तिष्ठति गोपिचन्दनं भक्त्या ललाटे मनुजो बिभर्ति चेत् ।
तस्मिन्गृहेऽहं निवसामि सर्वदा श्रियान्वितः कंसनिहा चतुर्मुख !॥ ८ ॥
यो धारयेद्द्वारवतीसमुद्भवां मृत्स्नां पवित्रां कलिकल्मषापहाम् ।
नित्यं ललाटे मम मन्त्रसंयुतां यमं न पश्येदपि पापसंयुतः ॥ ९ ॥
यस्याऽन्तकाले सुत! गोपिचन्दनं बाह्वोर्ललाटे हृदि मस्तके च ।
प्रयाति लोके कमलापतेर्मम गोबालघाती यदि ब्रह्महा स्यात् ॥ १० ॥
ग्रहा न पीड्यन्ति न रक्षसां गणा यक्षःपिशाचोरगभूतनायकाः ।
ललाटपट्टे सुत! गोपिचन्दनं सन्तिष्ठते यस्य मम प्रभावात् ॥ ११ ॥
ऊर्ध्वपुण्ड्रमृजुं सौम्यंललाटेयस्यदृश्यते । सचण्डालोऽपिशुद्धात्मा पूज्यएवनसंशयः
अस्नातो यः क्रियाः कुर्यादशुचिः पापसंयुतः ।
गोपीचन्दनसम्पर्कात्पूतो भवति तत्क्षणात् ॥ १३ ॥
अशुचिर्वाप्यनाचारो महापापं समाचरेत् । शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्राऽङ्कितोनरः
मत्प्रियार्थं शुभार्थं वा रक्षार्थं चतुरानन !। मत्पूजाहोमके चैव सायं प्रातः समाहितः
मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रं भवापहम् ॥ १५ ॥
ऊर्ध्वपुण्ड्रधरो मर्त्याम्रियतेयदिकुत्रचित् । श्वपाकोऽपिविमानस्थोममलोकेमहीयते
ऊर्ध्वपुण्ड्रधरो मर्त्या यदायस्याऽन्नमश्नुते । तदाविंशत्कुलंतस्यनरकादुद्धराम्यहम्
वीक्ष्याऽऽदर्शे जले वाऽपि यो विदध्यात्प्रयत्नतः ।
ऊर्ध्वपुण्ड्रं महाभाग! स याति परमां गतिम् ॥ १८ ॥
अनामिका शान्तिदोक्ता मध्यमाऽऽयुष्करी भवेत् ।
अङ्गुष्ठः पुष्टिदःप्रोक्तस्तर्जनी मोक्षदायनी ॥ १९ ॥
गोपीचन्दनखण्डं तु यो ददाति च वैष्णवे । कुलमष्टोत्तरं तेन तारितं वै भवेच्छतम्
यज्ञो दानंतपोहोमःस्वाध्यायःपितृतर्पणम । व्यर्थंभवतितत्सर्वमूर्ध्वपुण्ड्रविनाकृतम्

यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रविनाकृतम् । तन्मुखं नैव पश्यामिश्मशानसदृशंहितत्
ऊर्ध्वपुण्ड्रं प्रकुर्वीत मत्स्यकूर्मादिधारणम् ।
कुर्याद्विष्णुप्रसादार्थं महाविष्णोरतिप्रियम् ॥ २३ ॥
यत्पुनः कलिकाले तुमत्पुरीसम्भवांमृदम् । मत्स्यकूर्माऽङ्कितंचिह्नंगृहीत्वाकुरुतेनरः
देहे तस्य प्रविष्टंमांजानीहित्रिदशोत्तम !। तस्यमेनान्तरंकिञ्चित्कर्तव्यंश्रेयइच्छता
ममावतारचिह्नानि दृश्यन्ते यस्य विग्रहे । मर्त्यो मर्त्यो न विज्ञेयः सनूनंमामकीतनुः
पापं सुकृतरूपं तु जायते तस्य देहिनः । ममाऽऽयुधानिदृश्यन्तेलिखितानिकलौयुगे
उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्स्यमुद्रया ।
कूर्मया मामकं तेजो विक्षिप्तं तस्य विग्रहे ॥ २८ ॥
शङ्खञ्च पद्मञ्च गदां रथाङ्गं मत्स्यञ्च कूर्मं रचितं स्वदेहे ।
करोति नित्यं सुकृतस्य वृद्धिं पापक्षयं जन्मशतार्जितस्य ॥ २९ ॥
नारायणायुधैर्नित्यं चिह्नितो यस्यविग्रहः । पापकोटिप्रयुक्तस्य किं तस्यकुरुते यमः
शङ्खोद्धारे च यत्प्रोक्तं वसता कोटिजन्मभिः । तत्फलं लभते शङ्खेप्रत्यहंदक्षिणेभुजे
यत्फलं पुष्करे प्रोक्तं पुण्डरीकाक्षदर्शनात् । शङ्खोपरि कृते पद्मेतत्फलंकोटिसम्मितम्
वामे भुजे गदा यस्य लिखिता दृश्यतेकलौ । गदाधरो गयापुण्यंप्रत्यहंतस्ययच्छति
यच्चानन्दपुरे प्रोक्तं चक्रस्वामिसमीपतः । गदाचक्रेच लिखितेतत्फलं लिङ्गदर्शने ॥
ममायुधाऽङ्कितं देहं गोपीचन्दनमृत्स्नया । प्रयागादिषुतीर्थेषु स गत्वाकिंकरिष्यति
यदा यदा प्रपश्येत देहं शङ्खादिचिह्नितम् । तदातदा प्रसन्नोऽहं पापं तस्य दहामि वै
तिष्ठते यस्य देहे तु अहोरात्रं दिने दिने । शङ्खचक्रगदापद्मलिखितं स मदात्मकः ॥
नारायणायुधैर्युक्तं कृत्वाऽऽत्मानं कलौयुगे । यत्पुण्यं कर्म कुरुते मेरुतुल्यं न संशयः
शङ्खायुधाऽङ्कितो भक्त्या यः श्राद्धं कुरुते सुत !।
विधिहीनं तु सम्पूर्णं पितृणां दत्तमक्षयम् ॥ ३९ ॥
यथाऽग्निर्दहते काष्ठं वायुना प्रेरितोभृशम् । तथादह्यन्तिपापानि दृष्ट्वा म आयुधानिवै
ममनामाङ्कितांमुद्रामष्टाक्षरसमन्विताम् । शङ्खादिस्वायुधैर्युक्तांस्वर्णरौप्यमयीमपि

धत्ते भगवतो यस्तु कलिकाले विशेषतः । प्रह्लादस्य समो ज्ञेयो नान्यथामम वल्लभः
यस्य नारायणीमुद्रा देहं शङ्खादिचिह्नितम् । धात्रीफलैःकृतामालातुलसीकाष्ठसम्भवा
द्वादशाक्षरमन्त्रस्तु नियुक्तानि कलेवरे । आयुधानि च विप्रस्य मत्समःसचवैष्णवः
शङ्खाङ्कितततनुर्विप्रो भुङ्क्ते वै यस्य वेश्मनि । तदन्नं स्वयमश्नामिपितृभिःसहपुत्रक
कृष्णायुधाऽङ्कितं दृष्ट्वा सन्मानं न करोति यः ।
द्वादशाब्दार्जितम्पुण्यं बाष्कलेयाय गच्छति ॥ ४६ ॥
कृष्णायुधाऽङ्कितोयस्तुश्मशानेम्रियतेयदि । प्रयागेयागतिःप्रोक्तासागतिस्तस्यमानद
ममाऽऽयुधैः कलौ नित्यं मण्डितो यस्य विग्रहः ।
तत्राऽऽश्रमं प्रकुर्वन्ति विबुधा वासवादयः ॥ ४८ ॥
यः करोति च मे पूजां मम शस्त्राङ्कितो नरः । अपराधसहस्राणिनित्यंतस्यहराम्यहम्
कृत्वाकाष्ठमयंबिम्बंममशस्त्रैः सुचिह्नितम् । योवाऽङ्कयते देह तत्समोनाऽस्तिवैष्णवः
अष्टाक्षराऽङ्किता मुद्रा यस्य धातुमयीकरे । शङ्खपद्मादिभिर्युक्तापूज्यतेऽसौसुरासुरैः
धृता नारायणी मुद्रा प्रह्लादेन पुरा करे । विभीषणेन बलिना ध्रुवेण च शुकेन च ॥
मान्धात्रा ह्यम्बरीषेण मार्कण्डेयमुखैर्द्विजैः ॥ ५२ ॥
शङ्खादिचिह्नितैः शस्त्रैर्देहं कृत्वा च मानद ।। एवमाराध्य मां प्राप्तं समीहितफलंमहत्
गोपीचन्दनमृत्स्नयालिखितोयस्यविग्रहः । शङ्खचक्रादिपद्माऽङ्कोदेहे तस्यवसाम्यहम्
सौवर्णं राजतं ताम्रं कांस्यमायसमेव च । चक्रं कृत्वा तु मेधावी धारयीतविचक्षणः
द्वादशारं तु षट्कोणं वलित्रयविभूषितम् ॥ ५५ ॥
एवं सुदर्शनं चक्रं कारयीत विचक्षणः । उपवीतादिवद्धार्याः शङ्खचक्रगदाः सदा ॥
ब्राह्मणैश्च विशेषेण वैष्णवैश्च विशेषतः । उपवीतं शिखा यद्वच्चक्रं लाञ्छनसंयुतम्
चक्रलाञ्छनहीनस्य विप्रस्यविफलम्भवेत् । मम चक्राऽङ्कितोदेहःपवित्र इतिवैश्रुतिः
चक्राऽङ्किताय दातव्यं हव्यंकव्यं विचक्षणैः । मम चक्राऽङ्ककवचममेद्यं देवदानवैः
अजेयं सर्वभूतानां शत्रूणां रक्षसामपि ॥ ५६ ॥
मम चक्राऽङ्ककवचं शरीरे यस्य तिष्ठति । नाऽशुभं विद्यते तस्य गृहपुत्रादिकस्य हि

दक्षिणे च भुजे विप्रोबिभृयाद्वैसुदर्शनम् । सव्ये च शङ्खम्बिभृयादिति वेदविदोविदुः
तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक्पृथक् ॥ ६२ ॥
ललाटे च गदा धार्या मूर्ध्नि चापं शरस्तथा । नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये
तस्मात्सर्वप्रयत्नेन चक्रादीन्धारयेत्सदा । धारणानन्तरम्ब्रूयात्तत्र चैवं द्विजोत्तमः ॥
पुत्रमित्रकलत्रादिर्यः कश्चिन्मत्परिग्रहः । सह देहेनसर्वोऽसौ विष्णुप्रीत्यैमयाऽर्पितः
पश्चात्स्वधर्ममास्थाय तिष्ठेदाजीवनं मम ।
भक्त्या चाऽव्यभिचारिण्या सर्वदाऽऽप्तमनोरथः ॥ ६६ ॥
शङ्खचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः । अवलोक्य मुखन्तेषामादित्यमवलोकयेत्
श्रीकृष्णनाम चोच्चार्य शुद्धो भवति नान्यथा ॥ ६७ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे गोपीचन्दनादिशङ्खचक्राद्यायुधधारण-तत्तन्मुद्राधारणप्रकारकथनं नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

शङ्खपूजाविधिकथनम्

ब्रह्मोवाच

तप्तचक्राङ्कितं कृत्वा ह्यात्मानमथ दीक्षितम् । पद्माक्षतुलसीमालं किं फलं ब्रूहिकेशव

श्रीभगवानुवाच

तुलसीकाष्ठसम्भूतांयोमालांवहतेद्विजः । अप्यऽशौचोऽप्यनाचारोमामेवैतिनसंशयः
धात्रीफलकृता माला तुलसीकाष्ठसम्भवा । दृश्यते यस्य देहे तु स वै भागवतो नरः
तुलसीदलजांमालांकण्ठस्थांवहतेतुयः । ममोत्तीर्णाविशेषेणसततमस्योदिवौकसाम्

तुलसीदलजां मालां धात्रीफलकृतामपि । ददातिपापिनांमुक्तिंकिम्पुनर्मम सेविनाम्
तुलसीदलजां मालां ममोत्तीर्णां वहेत्तु यः । पत्रेपत्रेऽश्वमेधानां दशानांलभतेफलम्
तुलसीकाष्ठसम्भूतां यो मालां वहतेनरः । फलं यच्छाम्यहंवत्स प्रत्यहं द्वारकोद्भवम्

निवेद्य भक्तया मां मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ॥ ८ ॥

सदा प्रीतमनास्तस्य अहं प्राणवरोहि सः । तुलसीकाष्ठसम्भूतां यो मालांवहतेनरः

प्रायश्चित्तं न तस्याऽस्ति नाऽशौचं तस्य विग्रहे ॥ ९ ॥

तुलसीकाष्ठसम्भूतं शिरसः काष्ठभूषणम् । बाहौ करे च मर्त्यस्यदेहेयस्य समेप्रियः
तुलसीकाष्ठमालभिर्भूषितः पुण्यमाचरेत् । पितॄणां देवतानाश्चपुण्यं कोटिगुणम्भवेत्
तुलसीकाष्ठमालां तु प्रेतराजस्य दूतकाः । दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतंयथा दलम्

यद् गृहे तुलसीकाष्ठं पत्रं शुष्कमथाऽऽर्द्रकम् ।
भवन्ति तद्गृहे नैव पापं सङ्क्रमते कलौ ॥ १३ ॥

तुलसीकाष्ठमालाभिर्भूषितो भ्रमतेभुवि । दुःस्वप्नंदुर्निमित्तञ्च न भयंशात्रवंक्वचित्
धारयन्ति न ये मालां हैतुकाः पापबुद्धयः । नरकान्न निवर्तन्ते दग्धाकोपाग्निनामम

तस्माद्धार्या प्रयत्नेन माला तुलसिसम्भवा ।
पद्माक्षनिर्मिता भक्त्या फलैर्धात्र्या सुपुण्यदा ॥ १६ ॥
तदूर्ध्वपुण्ड्रशङ्खाद्यैर्युक्तस्तुलसिमूलके ।
सन्ध्योपास्त्यादिकं कुर्यात्कुशपाणिर्हि मां स्मरन् ॥ १७ ॥

कृतसन्ध्यादिको भक्तस्ततः सम्पूजयेच्च माम् । गुरुश्चेत्तत्रवर्तेतआदौगत्वानमेद्गुरुम्
किञ्चिद्दत्त्वोपायनं च दण्डवत्प्रणमेन्मुदा । आचम्यैकाग्रमनसा पूजामण्डपमाविशेत्
उपविश्याऽऽसने रम्येकृष्णाजिनकुशोत्तरे । सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत्
प्राणायामत्रयं कृत्वामन्त्रेण च जितेन्द्रियः । उदङ्मुखस्ततः कृत्वाहृत्पङ्कजमनुत्तमम्

विकासं तस्य कुर्वीत विज्ञानरविणा हृदि ॥ २१ ॥

कर्णिकायां न्यसेच्चाऽर्कं शशिनंचाग्निमेवच । त्रयंत्रयात्मकेतस्मिश्चिन्तयेद्वैष्णवोनरः

नानारत्नमयं पीठं तेषामुपरि विन्यसेत् ॥ २२ ॥

तस्मिन्मृदुश्लक्ष्णतरं बालार्कसदृशद्युति । अष्टैश्वर्यदलंपद्मं मन्त्राक्षरमयं न्यसेत् ॥
तस्मिन्देवं समासीनं कोटिशीतांशुसन्निभम् । चतुर्भुजंमहापद्मशङ्खचक्रगदाधरम् ॥
पद्मपत्रविशालाक्षंसर्वलक्षणलक्षितम् । श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रान्वितंचमाम्

विचित्राभरणैर्युक्तं दिव्यमण्डनमण्डितम् ।
दिव्यचन्दनलिप्ताङ्गं दिव्यपुष्पोपशोभितम् ॥ २६ ॥

तुलसीकोमलदलवनमालाविभूषितम् । कोटिबालार्कसदृशं कान्तंदिव्यश्रिया सह ॥
सर्वलक्षणलक्षिण्यासमाश्लिष्टतनुं शिवम् । एवंध्यात्वाजपेन्मन्त्रंसमाहितमनाःशुचिः
सहस्रं शतवारम्वा यथाशक्तिजपेन्मनुम् । मनसैवाऽर्चनं कृत्वा ततो विधिवदाचरेत्
सम्प्रदायाऽनुरोधेन शङ्खंस्थाप्य ममाऽग्रतः । दूर्वाङ्कुरैश्चपुष्पैश्चगन्धोदेनच पूरितम्

दक्षिणे गन्धपुष्पाणां पात्रं स्थाप्यं च देशिकैः ।
वामभागे न्यसेत्कुम्भं वस्त्रपूतं सुवासितम् ॥ ३१ ॥

पुरतो ममघण्टां च दिक्षुदीपान्नियोजयेत् । अन्यत्सर्वंसाधनंचयथास्थानेषुविन्यसेत्
अर्घ्यपाद्याऽऽचमनीयमधुपर्कस्यकारणात् । विन्यसेत्पुरतो मह्यं चत्वार्यमत्रकाणिवै

सिद्धार्थाऽक्षतपुष्पाणि कुशाग्रं तिलचन्दनम् ।
फलं यवाश्चतुर्वक्त्र ! अर्घ्यपात्रे विनिःक्षिपेत् ॥ ३४ ॥

दूर्वाविष्णुपदी श्यामा पद्मञ्चैव चतुर्थकम् । पाद्यपात्रे न्यसेत्पुत्र! देशिको मम तुष्टये
कङ्कोलञ्च लवङ्गञ्च फलंमालतिसम्भवम् । कुर्याद्वै श्रद्धया पुत्र! पात्रआचमनीयके ॥

गव्यं पयो दधि मधु घृतं खण्डसमन्वितम् ।
मधुपर्कस्य पात्रे वै दद्याद्वै श्रद्धयाऽर्चकः ॥ ३७ ॥

उक्तानां द्रव्यजातीनामलाभे पत्रपुष्पयोः । तत्तद्भावनया कुर्यात्सर्वदा विधिकोविदः
करन्यासं ततः कुर्यादङ्गन्यासं तथैव च । पञ्चाङ्गं वा षडङ्गं वा विन्यसेत्सम्प्रदायतः
ममाऽनुस्मरणं कार्यमात्मानं मत्समं स्मरेत् । पूजारम्भे चतुर्वक्त्र! मङ्गलं तु पठेन्नरः
अथसम्पूजयेच्छङ्खं पाञ्चजन्यं ममप्रियम् । यस्य सम्पूजनाद्वत्स आनन्दःपरमोमम

शङ्खस्य पूजने वत्स! मन्त्रानेतानुदीरयेत् ॥ ४१ ॥

त्वं पुरा सागरोत्पन्नो विष्णुनाविधृतः करे । निर्मितःसर्वदेवैश्चपाञ्चजन्यनमोऽस्तुते
तवनादेन जीमूतावित्रसन्ति सुराऽसुराः । शशाङ्काऽयुतदीप्ताभ! पाञ्चजन्यनमोऽस्तुते
गर्भादेवारिनारीणां विलीयन्ते सहस्रधा । तव नादेन पातालेपाञ्चजन्य! नमोऽस्तुते
दर्शनेनैव शङ्खस्य किं पुनः स्पर्शने कृते । विलयं यान्ति पापानि हिमवद्भास्करोदये

नत्वा शङ्खं करे धृत्वा मन्त्रैरेभिस्तु वैष्णवः ।
यः स्नापयति मां भक्त्या तस्य पुण्यमनन्तकम् ॥ ४६ ॥

सुवासितेन तैलेन कुर्यादभ्यञ्जनं ततः । कस्तूर्या चन्दनेनैव कुर्यादुद्वर्तनादिकम् ॥

सुगन्धवासितैस्तोयैः स्नाप्य मन्त्रयुतैः शुभैः ।
अर्घ्यं दत्त्वा ततो वत्स! पाद्यमाचमनीयकम् ॥
मधुपर्कं ततो दद्यादथ सर्वोपचारकान् ॥ ४८ ॥

वस्त्रैराभरणैर्दिव्यैरलङ्कृत्य यथाविधि । पुष्पैः सम्पूजयेत्पीठं तत्र देवं निधाय च ॥
वस्त्राऽलङ्कारगन्धादीनर्पयेच्छ्रद्धया मम । नैवेद्यं विविधं दद्यात्पायसाऽपूपमिश्रितम्

सकर्पूरञ्च ताम्बूलं भक्त्या चैव निवेदयेत् ॥ ५० ॥

सुरभीणि चपुष्पाणिभक्त्यासम्यङ्निवेदयेत् । धूपं दशाङ्गमष्टाङ्गं दीपञ्चसुमनोहरम्

परिणीय प्रणम्याऽथ स्तुत्वा स्तुतिभिरादरात् ।
शाययित्वा तु पर्यङ्के मङ्गलार्घ्यं निवेदयेत् ॥ ५२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांद्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे शङ्खपूजाविधिकथनंनाम
चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

पञ्चामृतस्नानमाहात्म्यवर्णनपूर्वकंशङ्खपूजनफलकथनम्

ब्रह्मोवाच

पञ्चामृतस्य स्नपनाद्यत्फलं लभते हरेः । शङ्खोदकेन यत्किञ्चित्तन्मे ब्रूह्यजिताऽच्युत॥

श्रीभगवानुवाच

क्षीरस्नानम्प्रकुर्वन्ति ये नराममभूर्द्धनि । शताश्वमेधजम्पुण्यं बिन्दुना बिन्दुनास्मृतम्
क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् । मधुनातद्दशगुणं सितया तु ततोऽधिकम्

गन्धपुष्पोदके मन्त्रं सर्वोत्कृष्टं प्रशस्यते ॥ ३ ॥

द्वादश्यां पञ्चदश्यां वा गव्येन पयसा मम । स्नापनं देवशार्दूल ! महापातकनाशनम्
दध्यादीनां विकाराणांक्षीरतः सम्भवो यथा । तथैव शेषकामानां क्षीरस्नपनतोमम

क्षीरस्नानेन सौभाग्यं दध्ना मिष्टान्नभोजनम् ।
घृतेन स्नापयेद्यो मां नरो मम पुरम्व्रजेत् ॥ ६ ॥

मधुना सितया यस्तु कारयेन्मार्गशीर्षके । स राजा जायतेलोके पुनः स्वर्गादिहागतः
गजाश्वरथसम्पूर्णं स राज्यं लभते भुवि । कारयेन्मार्गशीर्षे वै यः क्षीरस्नापनं मम
स्वर्गे लोके स जयति चन्द्रेन्द्ररुद्रमारुतान् । क्षीरस्नानं परं श्रेष्ठं मार्गशीर्षे च पुत्रक!
क्षीरस्नपनमाहात्म्यं वर्चस्कं पुष्टिवर्धनम् । दौर्भाग्यं विलयंयाति क्षीरस्नानेनमे सुत
स्नापयेन्मार्गशीर्षे मांयोवैपञ्चाऽमृतेन तु । स नशोच्यो भवेज्जन्तुर्बन्धुना भुविमानद!
कपिलाक्षीरमादाय यः स्नापयति मां सुत । कपिलाशतदानस्यफलम्प्राप्नोतिमानवः

शङ्खे तीर्थोदकं कृत्वा यः स्नापयति देशिकः ।
बिन्दुनाऽपि सहोमासे स्वकुलं तारयेद्धि सः ॥ १३ ॥
कापिलं क्षीरमादाय शङ्खे कृत्वा च मानवः ।
यः स्नापयति मां भक्त्या सर्वतीर्थफलं लभेत् ॥ १४ ॥

शङ्खे कृत्वा तु पानीयं साक्षतं कुशसंयुतम् ।
यः स्नापयेत्सहोमासे सर्वतीर्थफलं लभेत् ॥ १५ ॥
शङ्खाष्टकेन यः स्नानं कारयेन्मार्गशीर्षके । भक्त्या भगवतः श्रेष्ठो मम लोके महीयते ॥
शङ्खषोडशकेनाऽथ यः स्नापयति मे सुत !। स पापमुक्तः सुचिरं स्वर्गलोके महीयते
चतुर्विंशतिसङ्ख्याकैः शङ्खैर्यः स्नापयेच्च माम् ।
इन्द्रलोके चिरं स्थित्वा स राजा भुवि जायते ॥ १८ ॥
शङ्खाऽष्टोत्तरशतेनैव स्नापयेन्मार्गशीर्षके । शङ्खेशङ्खेसुवर्णस्यफलंप्राप्नोति मानवः
मार्गशीर्षे भक्तिमान्यः कृत्वा शङ्खध्वनिं हि माम् ।
स्नापयेत्पितरस्तस्य स्वर्गंतावत्प्रतिष्ठिताः ॥ २० ॥
अष्टोत्तरसहस्रन्तु शङ्खस्नानं तु यश्चरेत् । सगणोमुक्तिमाप्नोतियावदाभूतसम्प्लवम्
नित्यं संस्नापयेद्योमांशङ्खेनसुरसत्तम !। गङ्गास्नानफलम्प्राप्य नित्यं नन्दति देववत्
शङ्खे तोयं समादाययःस्नापयतिमांसुत । नमोनारायणेत्युक्त्वामुच्यतेसर्वकिल्बिषैः
कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम् ।
यो ददाति तिलोन्मिश्रं चान्द्रायणफलं लभेत् ॥ २४ ॥
नाद्यं तडागजम्वाऽपि वापीकूपादिकञ्च यत् । गाङ्गेयं जायतेसर्वंजलंशङ्खकृतञ्चयत् ॥
गृहीत्वामम पादाम्बुशङ्खेकृत्वातुवैष्णवः । योवहेच्छिरसानित्यंसमुनिस्तपताम्वरः
त्रैलोक्ये यानि तीर्थानि मम वैवाऽऽज्ञया सुत !।
शङ्खे तानि वसन्तीह तस्माच्छङ्खो वरः स्मृतः ॥ २७ ॥
साम्बुं शङ्खेकरेधृत्वामन्त्रैरेतैस्तुवैष्णवः । यःस्नापयेन्मार्गशीर्षेतुष्टस्तस्यभवाम्यहम्
शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुण देवता । पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥
तेषामुच्चारपूर्वन्तु स्नापयेन्मामतन्द्रितः । तस्यपुण्यस्यसङ्ख्यांवैकर्तुं नैवसुराःक्षमाः
पुरतो ममदेवेश सपुष्पः सजलाक्षतः । शङ्खस्त्वभ्यर्चितस्तिष्ठेत्तस्यश्रीःसर्वतोमुखी
विलेपनेन सम्पूर्णं शङ्खं कृत्वा तु मां भजेत् । तदा मे परमा प्रीतिर्भवेद्वैशतवार्षिकी
शङ्खे कृत्वा तु पानीयं सपुष्पं सजलाक्षतम् ।

अर्घ्यं ददाति यो मां वै तस्य पुण्यमनन्तकम् ॥ ३३ ॥
अर्घ्यं कृत्वा स्वयं शङ्खे यः करोति प्रदक्षिणाम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ३४ ॥
भ्रामयित्वा च मे मूर्ध्निमन्दिरंशङ्खवारिणा । प्रोक्षयेद्वैष्णवोयस्तुनाशुभंतद्गृहेभवेत्
नाऽऽध्ययो न क्रमस्तस्यनारकंनभयंकचित् । यस्यपादोदकं शङ्खेकृतं मूर्धानमालभेत्
ग्रहा रक्षांसिकूष्माण्डपिशाचोरगदानवाः । दृष्ट्वाशङ्खोदकं मूर्ध्नि विद्रवन्तिदिशोदश
वादित्रनिनदैरुच्चैर्गीतमङ्गलनिःस्वनैः । यःस्नापयतिमांभक्त्या जीवन्मुक्तोभवेद्धिसः

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे शङ्खपूजनफलकथनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

भगवतेतुलसीकाष्ठचन्दनार्पणफलवर्णनम्

ब्रह्मोवाच

घण्टानादस्य माहात्म्यं चन्दनस्य तथाऽच्युत ।
यत्फलं लभते स्वामिंस्तत्सर्वम्ब्रूहि तत्त्वतः ॥ १ ॥

श्रीभगवानुवाच

स्नानार्चनक्रियाकाले घण्टानादं करोति यः । पुरतो मम देवेश तस्य पुण्यफलं शृणु
वर्षकोटिसहस्राणि वर्षकोटिशतानि च । वसते मामके लोके अप्सरोगणसेवितः
सर्ववाद्यमयी घण्टा सर्वदेवमयी यतः । तस्मात्सर्वप्रयत्नेन घण्टानादं तु कारयेत्
सर्ववाद्यमयी घण्टा सर्वदा मम वल्लभा । वादनाल्लभते पुण्यं यज्ञकोटिशतोद्भवम् ॥५
घण्टानादः सदा कार्यः पूजाकाले विशेषतः । मन्वन्तरसहस्राणि मन्वन्तरशतानिच

प्रीतो भवामि सततं घण्टानादेन पुत्रक ! । भेरीशङ्खनिनादेन घण्टानादान्वितेन च
मृदङ्गशङ्खेन युतं प्रणवेन समन्वितम् । अर्चनं मम देवेश! सततं मोक्षदं नृणाम् ॥ ८
यत्र तिष्ठेत पुरतो घण्टानादान्विता मम । अर्चिता वैष्णवैर्यत्र तत्र मां विद्धि पुत्रक!
वैनतेयाऽङ्किता घण्टा सुदर्शनयुताऽथवा । ममाग्रे स्थापयेद्यस्तु तस्यपापं हराम्यहम्
मदीयार्चनवेलायां घण्टानादंकरोति यः । नश्यन्तितस्यपापानिशतजन्मार्जितान्यपि
स्वापकाले प्रकुर्वीतघण्टानादं स्वभक्तितः । ममैवाऽर्चनवेलायां फलंकोटिगुणाद्भवम्
ये मामर्चन्ति देवेशं सुपर्णोपरिसंस्थितम् । शङ्खपद्मगदायुक्तं सचक्रं च श्रियायुतम्
किं करिष्यन्ति ते तीर्थैर्देवतानां च दर्शनैः । किं यज्ञैर्व्रतैर्वापिकिंदानैःकिमुपोषणैः
मूर्तिर्नारायणी यैश्च मामकी गरुडोपरि । स्थापितातेकलौयान्तिकल्पकोटिपदंमम
ममाऽग्रे स्थापयेद्यस्तु प्रासादेऽथगृहेऽथवा । तीर्थकोटिसहस्राणितत्रतिष्ठन्तिदेवताः
यस्तु पूजयते धन्यो गरुडोपरि संस्थितम् । एकादश्यांतथारात्रौवासनासंयुतोमम

कृत्वा गीतञ्च नृत्यञ्च तारयेन्नरकात्पितृन् ॥ १७ ॥

पुनश्च कथयिष्यामि शृणु घण्टामहं सुत !॥ १८ ॥

मम नामाङ्किता घण्टा पुरतो या च तिष्ठति । अर्चितावैष्णवैर्यत्रतत्रमांविद्धिपुत्रक
यस्तु वादयते घण्टां वैनतेयविचिह्निताम् । धूपे नीराजने स्नाने पूजाकाले विलेपने
ममाऽग्रे प्रत्यहं वत्स! प्रत्येकं लभतेफलम् । मखायुतंगोऽयुतं चचान्द्रायणशतोद्भवम्
विधिबाह्यकृता पूजा सफलाजायतेनृणाम् । घण्टानादेनतुष्टोऽहंप्रयच्छामिस्वकंपदम्
नागाऽरिचिह्निता घण्टा रथाङ्गेन समन्विता । वादनात्कुरुतेनाशंजन्मकोटिभयस्यवै
गरुडेनाऽङ्कितां घण्टांदृष्ट्वाऽहं प्रत्यहं मुदा । प्रीतिं करोमिदेवेशलक्ष्मींप्राप्ययथाऽधनः
घण्टादण्डस्यशिरसिसुचक्रं स्थापयेत्तु यः । मत्प्रियंवैनतेयस्वा स्थापितं भुवनत्रयम्

घण्टानादं स चक्रञ्च अन्तकाले शृणोति यः ।

पापकोटियुतस्याऽपि नश्यन्ति यमकिङ्कराः ॥ २६ ॥

सर्वदोषाःप्रणश्यन्तिघण्टानादेन वै सुत । देवतानां स रुद्राणां पितृणामुत्सवोभवेत्
अभावे वैनतेयस्यचक्रस्याऽपि न संशयः । घण्टानादेन भक्तानां प्रसादं प्रकरोम्यहम्

गृहे यस्मिन्भवेन्नित्यंघण्टानागारिसंयुता । सर्पाणां न भयं तत्रनाग्निविद्युत्समुद्भवम्
यस्य घण्टा गृहे नास्ति शङ्खो न पुरतो मम । कथं भागवतो ज्ञेयः कथंभवतिवल्लभः
चन्दनस्य प्रवक्ष्यामि माहात्म्यं तवपुत्रक !। यस्मिन्कृतेभवेत्प्रीतिर्ममात्यन्तंनसंशयः
सचन्दनं सकुसुमं कर्पूरागुरुमिश्रितम् । मृगनाभिसमायुक्तं जातीफलसमन्वितम् ॥
तुलसीचन्दनोपेतंममात्यन्तसुखावहम् । यो ददातिहिमांनित्यं तुलसीकाष्ठसम्भवम्

युगानि वसते स्वर्गे ह्यनन्तानि नरोत्तमः ।

महाविष्णोःकलौ भक्त्या दत्त्वा तुलसिचन्दनम् ॥ ३४ ॥

अर्चयेन्मालतीपुष्पैर्नभूयः स्तनपो भवेत् । तुलसी काष्ठसम्भूतं चन्दनं यच्छते मम
दहामि पातकं सर्वं पूर्वजन्मशतैः कृतम् । सर्वेषामेव देवानां तुलसीकाष्ठचन्दनम् ॥

पितृणाञ्च विशेषेण सदऽभीष्टं यथा मम ॥ ३७ ॥

श्रीखण्डं चन्दनं तावच्छ्रेष्ठं कृष्णागुरुं तथा । यावन्नदीयते मह्यं तुलसीकाष्ठचन्दनम्
तावत्कस्तूरिकामोदः कर्पूरस्य सुगन्धिता । यावन्नदीयते मह्यं तुलसीकाष्ठचन्दनम्

कलौ यच्छन्ति ये मह्यं तुलसीकाष्ठचन्दनम् ।

मार्गशीर्षशुभे मासे ते कृतार्था न संशयः ॥ ४० ॥

यो हि भागवतो भूत्वाकलौतुलसिचन्दनम् । नार्पयेद्वैसहोमासे नाऽसौभागवतोनरः
कुङ्कुमागुरुश्रीखण्डकर्दमैर्मम विग्रहम् । आलिम्पेद्वैसहोमासे कल्पकोटिं वसेद्दिवि
कर्पूरागुरुमिश्रेण चन्दनेनाऽनुलिम्पयेत् । मृगदर्पं विशेषेण अभीष्टं च सदा मम ॥

विलेपयति यो मां वै शङ्खे कृत्वा तु चन्दनम् ।

मार्गशीर्षे तदा प्रीतिं करोमि शतवार्षिकीम् ॥ ४४ ॥

सेवते तुलसीपत्रैर्नित्यमामलकैश्च यः । मार्गशीर्षे सदाभक्त्या स लभेद्वाञ्छितंफलम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे भगवते तुलसीकाष्ठचन्द-
नार्पणफलकथनंनाम षष्ठोऽध्यायः ॥ ६ ॥

———

सप्तमोऽध्यायः

जातीपुष्पश्रैष्ठ्यकथनपूर्वकं विष्णुकण्ठेतत्सहस्रपुष्पाङ्कितमाला-स्थापनफलवर्णनम्

ब्रह्मोवाच

माहात्म्यं वद देवेश! पुष्पजातिसमुद्भवम्। येनयेन चपुष्पेण यत्फलं लभते नरः ॥१

श्रीभगवानुवाच

शृणुपुत्रप्रवक्ष्यामिमाहात्म्यंपुष्पसम्भवम्। येन पुष्पेण मे प्रीतिर्भवेत्सम्यङ्नसंशयः

मल्लिका मालतीचैव यूथिकाचातिमुक्तका। पाटलाकरवीरश्च जयन्ती विजयातथा ॥

कुब्जकस्तबकश्चैव कर्णिकारं कुरण्टकः। चम्पकश्चातकः कुन्दो बाणःकर्चूरमल्लिका

अशोकस्तिलकश्चैव तथैवाऽपरयूथिकः। अमी पुष्पप्रकारास्तु शस्ता मे पूजने सुत!

केतकीपत्रपुष्पञ्च भृङ्गराजस्तथैव च। तुलसीपत्रपुष्पञ्च सद्यः प्रीतिकरं मम ॥ ६ ॥

पद्मान्यम्बुसमुत्थानि रक्तनीलोत्पले तथा।

सितोत्पलं सहोमासे ममाऽत्यन्तं हि वल्लभम् ॥ ७ ॥

तान्येवच प्रशस्तानि कुसुमानि च मे सुत !। यानिस्युर्वर्णयुक्तानि रसगन्धयुतानिच

निर्गन्धान्यपि शस्तानि कुसुमानि मतानि मे।

सुरभीणि तथाऽन्यानिवर्जयित्वा तु केतकीम् ॥ ९ ॥

बाणश्च चम्पकाऽशोकं करवीरश्चयूथिका। पारिभद्रं पाटला च वकुलं गिरिशालिनी

बिल्वपत्रं शमीपत्रं पत्रं भृङ्गिरजस्यच। तमालामलकीपत्रं शस्तं मे पूजने सुत !॥

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः। अपर्युषितनिश्छिद्रैःप्रोक्षितैर्जन्तुवर्जितैः ॥

अथारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्च माम्। पुष्पजातिविशेषेण भवेत्पुण्यं विशेषतः

तपःशीलगुणोपेते पात्रे वेदस्य पारगे। दश दत्त्वा सुवर्णानि यत्फलं लभते नरः ॥

तत्फलं लभते मर्त्यः सहे कुसुमदानतः ॥ १४ ॥

द्रोणपुष्पे तथैकस्मिन्मह्यं च विनिवेदिते। दश दत्त्वा सुवर्णानिफलं तदधिकं सुत!

पुष्पात्पुष्पान्तरे भेदो यथाऽऽसीत्तन्निबोध मे ॥ १६ ॥

द्रोणपुष्पसहस्रेभ्यःखादिरन्तुविशिष्यते। खादिरात्पुष्पसाहस्राच्छमीपुष्पंविशिष्यते

शमीपुष्पसहस्रेभ्यो बिल्वपुष्पंविशिष्यते। बिल्वपुष्पसहस्रेभ्योबकपुष्पंविशिष्यते

बकपुष्पसहस्रेभ्यो नन्द्यावर्तम्विशिष्यते।

नन्द्यावर्तसहस्राद्धि करवीरं विशिष्यते ॥ १९ ॥

करवीरसहस्रस्य कुसुमं श्वेतमुत्तमम्। करवीरश्वेतपुष्पात्पालाशं पुष्पमुत्तमम् ॥

पालाशपुष्पसाहस्रात्कुशपुष्पं विशिष्यते। कुशपुष्पसहस्राद्धि वनमाला विशिष्यते

वनमाला सहस्राद्धि चम्पकश्च विशिष्यते।

चम्पकस्य पुष्पशतादशोकं पुष्पमुत्तमम् ॥ २२ ॥

अशोकपुष्पसाहस्रात्सेवन्ती पुष्पमुत्तमम्। सेवन्तीपुष्पसाहस्रात्कुजकंपुष्पमुत्तमम्

कुजपुष्पसहस्राद्धि मालतीपुष्पमुत्तमम्। मालतीपुष्पसाहस्रात्सन्ध्यापुष्पंविशिष्यते

सन्ध्यापुष्पसहस्राद्धि त्रिसन्ध्यापुष्पमुत्तमम् ॥ २५ ॥

त्रिसन्ध्यारक्तसाहस्रात्त्रिसन्ध्याश्वेतमुत्तमम्।

त्रिसन्ध्याश्वेतसाहस्रात्कुन्दपुष्पं विशिष्यते ॥ २६ ॥

कुन्दपुष्पसहस्राद्धि जातीपुष्पं विशिष्यते।

सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम् ॥ २७ ॥

जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभनाम्।

मह्यं यो विधिवद्दद्यात्तस्य पुण्यफलं शृणु ॥ २८ ॥

कल्पकोटिसहस्राणि कल्पकोटिशतानिच। मत्पुरे वसते नित्यं मम तुल्यपराक्रमः

येषां सन्ति चपुष्पाणिप्रशस्तानिममाऽर्चने। तेषांपत्राणिशस्तानितदभावेफलानिच

पत्रैः पत्रैश्च पुष्पैश्च फलैश्चाऽपि तथा हि माम्।

अर्चन् दशसुवर्णस्य प्रत्येकं फलमाप्नुयात् ॥ ३१ ॥

एताभिःपुष्पजातीभिःसहोमासेऽर्चयन्तिये। भक्तिंददामि तेषाम्वै तुष्टःसन्नात्रसंशयः

धनम्पुत्रांस्तथादारान्यत्किञ्चिद्वाञ्छतेहि सः । तत्तद्ददामिदेवेश पुष्पैरेभिःप्रतोषितः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे जातीपुष्पश्रैष्ठ्यकथनपूर्वकं विष्णुकण्ठे तत्सहस्रपुष्पाङ्कितमालास्थापनफलवर्णनं सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

तुलसीपत्रधूपदीपमाहात्म्यवर्णनम्

ब्रह्मोवाच

श्रीमत्तुलसिमाहात्म्यंयथावद्वर्णयप्रभो !। यस्याःसन्निधिमात्रेणप्रीतिर्भवतितेऽधिका

श्रीभगवानुवाच

मणिकाञ्चनपुष्पाणि तथामुक्तामयानिच । तुलसीपत्रदानस्यकलांनार्हन्तिषोडशीम् तुलसीमञ्जरीभिर्यः कुर्याद्वै मम पूजनम् । न स गर्भगृहं यायान्मुक्तिभागी भवेन्नरः ॥ आरोप्य तुलसीं वत्स! पूजयेत्तद्दलैश्च माम् । दिवि सम्मोदमानः सश्वेतद्वीपेचस्वेगृहे

श्रीमत्तुलस्यार्चयते सकृद्धि मां पत्रैः सुगन्धैर्विमलैरखण्डितैः ।

यस्तस्य पापं पटसंस्थितं तदा निरीक्षयित्वा परिमार्जयेद्यमः ॥ ५ ॥

तुलसी न येषां मम पूजनार्थं सम्पादितैकादशिपुण्यवासरे ।

धिग्यौवनंजीवितमर्थसन्ततिस्तेषां सुखं नेह च दृश्यते परे ॥ ६ ॥

लिङ्गमभ्यर्चितं दृष्ट्वा सहोमासे च मामकम् । तुलसीपत्रनिकरैर्मुच्यते ब्रह्महत्यया ॥ नित्यमभ्यर्चयेद्यो वै तुलस्यामां रमेश्वरम् । महापापानिनश्यन्तिकिंपुनश्चोपपातकम् वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् । न वर्ज्यंतुलसीपत्रंनवर्ज्यजाह्नवीजलम् तावद्गर्जन्ति पुष्पाणि मालत्यादीनिभोः सुत !। यावन्नप्राप्यतेपुण्यातुलसीममवल्लभा

सकृदभ्यर्चयेद्यो मां बिल्वपत्रेण मानवः । मुक्तिभागी निरातङ्कोममपार्श्वगतोभवेत् बिल्वपत्राच्छमीपत्राज्जातीपत्रात्सरोरुहात् । वल्लभं तुलसीपत्रं कौस्तुभादधिकंमम अभिन्नपत्रा तुलसी हृद्या मञ्जरिसंयुता । क्षीरोदार्णवसम्भूता पद्मवेयं सदा मम ॥ अकृष्णाऽप्यथवाकृष्णातुलसीममवल्लभा । सितावाऽप्यसितावापिद्वादशीवल्लभायथा गृहीत्वा तुलसीपत्रं भक्तयायो मां समर्चयेत् । अर्चितं तेन सकलं सदेवासुरमानुषम् तावद्गर्जन्ति रत्नानि कौस्तुभादीन्यनन्तशः । यावन्न प्राप्यते कृष्णतुलसीकृष्णमञ्जरी कृष्णं कृष्णतुलस्या हियोभक्त्यापूजयेन्नरः । सयातिभुवनंशुभ्रंयत्रविष्णुः श्रिया सह

ममाऽर्चनार्थं भिक्षूणां यच्छन्ति तुलसीदलम् ।

अन्येषामपि भक्तानां यान्ति ते पदमव्ययम् ॥ १८ ॥

तुलसी कृष्णगौरा या तया यो मां समर्चयेत् ।

नरो याति तनुं त्यक्त्वा वैष्णवीं शाश्वतीं गतिम् ॥ १९ ॥

ब्रह्मोवाच

धूपदानस्य माहात्म्यं दीपस्याऽपि च केशव । यत्फलंलभतेमर्त्यस्तन्मेब्रूहियथार्थतः

श्रीभगवानुवाच

शृणु पुत्र! प्रवक्ष्यामि धूपदानस्य यत्फलम् । दीपदास्य माहात्म्यं ममप्रीतिकरंपरम् अगुरुञ्च सकर्पूरं दिव्यचन्दनसौरभम् । दत्त्वा मां वै सहोमासे कुलानांतारयेच्छतम् कृष्णागुरुसमुत्थेन धूपेन च ममाऽलयम् । धूपयेद्वैष्णवो यस्तु समुक्तोनरकार्णवात् माहिषं गुग्गुलंयस्तुआज्ययुक्तंसशर्करम् । धूपं ददाति योवैमांतस्येच्छांप्रददाम्यहम् गुग्गुलोहन्त्यशेषाणि अरिष्टानिच धूपितः । कामान् नानाविधांश्चैवअगुरुःसम्प्रयच्छति देहं गेहं पुनात्येव धूपस्त्वगुरुसम्भवः । नाशयेद्यक्षरक्षांसि धूपः सर्जरसोद्भवः ॥ २६ जातिपुष्पमथैलाच गुग्गुलश्च हरीतकी । कुष्ठः सर्जरसश्चैव गुडः सैलाच्छडस्तथा

नखयुक्तानि चैतानि दशाङ्गो धूप उच्यते ॥ २७ ॥

धूपं दशाङ्गं यदि चेत्करोति मासे सहे मे अतिवल्लभे च ।

ददामि कामानतिदुर्लभानपि बलञ्च पुष्टिं सुतदारभक्तिम् ॥ २८ ॥

मुस्ताधूपे मानुषाणां प्रियत्वं माङ्गल्यकं वश्यकरं गुडस्य ।
कुर्यात्सहोमासि ममाऽग्रतो यो विहाय पापानि स मां समाप्नुयात् ॥
न भयं विद्यते तस्यदिव्यभौमान्तरिक्षजम् । ममधूपावशेषेणयस्याऽङ्गंपरिमार्जितम्
न चापद्विद्यते तस्य भवन्तिसम्पदोऽखिलाः । धूपेकृतेसहोमासेममाग्रेश्रद्धयाऽनिशम्
धूपः सुरूपतां धत्ते धूपः पावनमुत्तमम् । वनस्पतिरसो दिव्यः परमः पावनः शुचिः
अतः परं प्रवक्ष्यामि दीपमाहात्म्यमुत्तमम् । यस्मिन्कृते नरोयातिवैकुण्ठंनात्रसंशयः
बहुवर्तिसमायुक्तं घृतपूरसमन्वितम् । कुर्याद्वारार्तिकं यो वै कल्पकोटिं दिवं वसेत्
नीराजनं तु यः पश्येत्सहोमासे ममाऽग्रतः । सप्तजन्म भवेद्विप्रो ह्यन्ते च परमम्पदम्
कर्पूरेण तु यः कुर्याद्भक्त्या चैव ममाग्रतः । आरार्तिकंद्विजश्रेष्ठ! प्रविशेन्मामनन्तकम्
मन्त्रहीनं क्रियाहीनं यत्कृतं पूजनं मम । सर्वं सम्पूर्णतामेति कृते नीराजने सुत !॥
यः करोति सहोमासे कर्पूरेण च दीपकम् । अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत्
ममाऽग्रे वै द्विजानाञ्च दीपं दद्याच्चतुष्पथे । मेधावी ज्ञानसम्पन्नश्चक्षुष्माञ्जायते नरः
घृतेन वाऽथ तैलेन दीपं प्रज्वालयेन्नरः । सहोमासे ममाऽग्रे च तस्य पुण्यफलं शृणु
विहाय सकलं पापं सहस्रादित्यसन्निभः । ज्योतिष्मता विमानेन मम लोकेमहीयते
तस्मात्सर्वप्रयत्नेन दीपं दद्याद्विचक्षणः । तञ्च दत्त्वा विहिंसेद्यः स पतेन्नरके ध्रुवम्
दीपंयोवैहरेत्पापीलोभाद्वद्वेषाद्द्विजोत्तम । तद्दीपहरणात्सोऽपिमूकोऽन्धश्चप्रजायते
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे दीपमाहात्म्यवर्णनं
नामऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

नैवेद्यविधिकथनम्

ब्रह्मोवाच

नैवेद्यस्य विधिं ब्रूहि देव! मे तत्त्वतः प्रभो !। अन्नं कतिविधञ्चैवंव्यञ्जनादीन्यशेषतः

श्रीभगवानुवाच

साधु पृष्टं त्वया वत्स! ममप्रीतिकरम्परम् । वक्ष्यामितेऽन्नपानादिव्यञ्जनादीन्यशेषतः
आदौ हिरण्मयं पात्रंतदभावे च राजतम् । तदभावेच्च पालाशं विस्तीर्णम्बहुसुन्दरम्
कचोलाः शतशः कार्याः पात्रे वैपरितोऽनघ !। तन्मध्येव्यञ्जनादेयानानाफलमयाःशुभाः
पायसञ्चन्द्रसङ्काशं पात्रे वैशर्करायुतम् । भक्तं कुमुदसङ्काशं सुद्गान्काचप्रभान् शुभान्
नानाव्यञ्जनसंरुद्धंत्रिभिः पङ्क्तिभिरेव च । निम्बूरसेन चन्द्रेण फलमूलयुतेन च ॥
वैकृताश्च तदा कार्याः शतशो भोजने मम ।
द्राक्षास्तु मिश्रिताश्चूतकरमर्दकृताः शुभाः ॥ ७ ॥
मरीचपिप्पलीसार्द्रकैलाचन्द्रकसंयुताः । क्वथिताः कथिकाःकार्याःशतशोभोजनेमम
प्रलेहनास्तथा कार्याःकचोलशतसङ्कुलाः । नानाकुसुमसम्मोदयुक्ताः सहसि मे प्रिया
मण्डका वर्तुला रम्याः समाः सर्वत्रबिन्दुवत् । सितयासहितेनाऽथदुग्धेनक्वथितेनच्च
मधुवर्णेन गव्येन युक्तेतस्मिन्सुभोजने । कचोले सुप्रभे वत्स! स्थितंकाञ्चनसुप्रभम्
घृतं सुवासितं प्रीत्या देयंहि मम भोजने । तत्र गोधूमपात्रेणचन्द्रकेणहिचोज्ज्वलम्
सौवाहिकाः पूरिकास्तु शतच्छिद्राः सवेष्टिकाः ।
अपूपाश्च तथा क्षीरप्रकारांस्तु प्रकारयेत् ॥ १३ ॥
मणयः सूत्रसञ्ज्ञाश्च मालतीकुसुमादयः । पर्पटा वर्पटारम्या माषकूष्माण्डसम्भवाः
वटकानूनवधा रम्यान्कुर्यान्मासे सहेमम । द्विधा जातामरीचैश्च पूरिता द्रोणकेशुभाः
युक्तेन लवणेनाऽतिशुद्धतैलेन पूरिताः । कुङ्कुमाभाः स्नेहहीनाः सक्षता इव दुर्जनाः ॥

दधिदुग्धयुताः केचिच्चिञ्चिणीचूतसम्भवाः । द्राक्षारसयुताः केचित्तथैवेक्षुरसैर्युताः
राजिका जलमध्यस्थास्तथाऽन्ये सितयासह । रसैश्चतुर्विधैश्चान्यैर्वटकानवधामताः
चन्नप्रभाऽनुकणिकाचारवीजसुखारिकैः । शकलैर्नारिकेलस्य लवङ्गशतसंयुताः ॥१६

घृतक्षीरसितायास्ताः कटाहे सुप्रलोडिताः ।
लब्धासितादिक्तसररम्यास्निग्धाश्चफेणिकाः ॥ २० ॥

पराकिकासु वै पक्वाः कृताश्चन्द्रेणपोलिकाः । मोदकास्तत्रवैकार्याश्चारवीजभवाःपरे
सितयासहिताःकार्याअन्यैदुग्धेननिर्मिताः । नारिकेलफलैश्चाऽन्यैवृक्षनिर्यासनिर्मिताः
बदामैश्चशुभाश्चाऽन्यैतिलैश्चकणबीजकैः । ईदृशान्मोदकांश्चान्यांस्तुप्रत्यर्थममकारयेत्
अर्शोघ्नं मोचनीकन्दं तथाऽऽर्दकरमर्दकम् । नारिङ्गं चिञ्चिणीकञ्चकङ्कोलफलमेवच
दशारं त्रिपुरीजातं शुभं निम्बफलं विसम् । तिन्दूफलं लवङ्गञ्च श्रीफलं तिलकंलुति
वल्कलं वंशकारीरं यथा कायफलं बलम् । द्राक्षाफलंचूतफलंरम्यंकण्टकिनीफलम्
धात्रीफलं शुक्तिभवं फलमम्बाभवं तथा । रम्भाफलं पिप्पली च मरीचाश्च मनोहराः
शुद्धसर्षपतैलेन लवणेन सुवेधितम् । तथा राजिकया विद्धं त्रिभिर्वर्वैर्घटे स्थितम्
एवम्विधानि जातानि व्यञ्जनानि च मानद !। कर्तव्यानिसहोमासेममप्रीतिकराणिवै
एतादृशे भोजने चेदसामर्थ्यं भवेद्यदि । एवं कार्यं तदा तेन सङ्क्षेपेण शृणुष्व मे

लड्डूकमेकं घृतपूरमेकं फेनद्वयं कोकरसत्रयञ्च ।
घृतप्लुतं सण्डकषोडशानां वटाष्टदायी नरकं न पश्येत् ॥ ३१ ॥

अर्द्धाढकं सुचिरपर्युषितञ्च दुग्धं खण्डस्य षोडशपलानि शशिप्रभस्य ।
सर्पिष्पलं मधुफलं मरिचं द्विकर्षं शुण्ठ्याःपलार्धमथवाऽर्धपलं चतुर्णाम् ॥ ३२ ॥
श्लक्ष्णे पटे ललनया मृदुपाणिपुष्टां कर्पूरधूलिधवलीकृतभाण्डसंस्थाम् ।
एतां शुभां रसवतीं प्रकरोति यो वै कामान्ददामि सकलान्मनुजस्य तस्य

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे नैवेद्यविधिकथनंनाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

पूजाविधिसमापनंतदुद्यापनंतत्फलवर्णनम्

ब्रह्मोवाच

नैवेद्यानन्तरं तात! किंकर्तव्यं नृभिः प्रभो !। यत्कर्तव्यं सहोमासेतत्सर्वं ब्रूहितत्त्वतः

श्रीभगवानुवाच

अथ भुक्तवते दत्त्वा जलैः कर्पूरवासितैः । आचमनञ्च ताम्बूलं चन्दनं करमार्जनम्
पुष्पाञ्जलिं ततः कुर्याद्भक्त्याऽऽदर्शं प्रदर्शयेत् । नीराजनंततः कार्यं कार्पूरं विभवे सति
समर्प्य मुकुटादीनि भूषणानि विचक्षणः । ततः पश्चान्महाभाग! प्रकल्प्यच्छत्रचामरे
प्रसादसुमुखं ध्यात्वा श्यामसुन्दरविग्रहम् । जपेदष्टोत्तरशतं स्तुवीतस्तुतिभिःप्रभुम्
शङ्खरौप्यमयी माला काञ्चनी च विशेषतः । पद्माक्षैश्चैव सुभगैर्विद्रुमैर्मणिमौक्तिकैः
रचितेन्द्राक्षकैर्माला तथैवाङ्गुलिपर्वभिः । पुत्रजीवमयी माला शस्ता वै जपकर्मणि
न च क्रमन्न च हसन्न पार्श्वमवलोकयन् । न पदा पदमाक्राम्य करप्राप्तशिरास्तथा
नोत्तिष्ठन्मन्मनु विद्वान्न जपेद्व्यग्रमानसः । जपकाले न भाषेत व्रतहोमार्चनादिषु
गृहेष्वेकगुणं जाप्यं गोष्ठे दशगुणं भवेत् । नदीतीरे शतंविद्यादग्न्यगारेदशाऽधिकम्
तीर्थादिषु सहस्रं स्यादनन्तं ममसन्निधौ । एवंकृत्वासहोमासेयःकुर्याच्चप्रदक्षिणाम्
सप्तद्वीपवतीपुण्यं लभते स पदेपदे । पठन्नामसहस्रं तु अथवा नाम केवलम् ॥ १२ ॥
एका प्रदक्षिणा भक्त्या दहेत्पापंसदाऽऽह्निकम् । प्रदक्षिणीकृतातेनसप्तद्वीपावसुन्धरा
दिनसप्तोद्भवं पापं मम तिस्रः प्रदक्षिणाः । तत्क्षणान्नाशयन्त्येव पापंदेहेदशाऽऽह्निकम्
कृताःप्रदक्षिणायेनएकविंशति भक्तितः । भ्रूणहत्यादिपापानिनाशमायान्तितत्क्षणात्
अष्टोत्तरशतं येन कृता भक्त्या प्रदक्षिणाः । तेनेष्टं क्रतुभिः सर्वैः समाप्तवरदक्षिणैः
प्रदक्षिणीकृता तेन तावद्वारं वसुन्धरा । मातुः प्रदक्षिणास्तद्वद्भूतधात्रीप्रदक्षिणाः
शालग्रामशिलायाश्च सममेतत्त्रयं स्मृतम् । एको दण्डप्रपातश्च सहे सप्तप्रदक्षिणाः

सममेतद्द्वयं लोवा दण्डपातो विशिष्यते । प्रदक्षिणे दण्डपातं यः करोति सदामम सहोमासे विशेषेण आकल्पं स वसेद्दिवि । कल्पादनन्तरं तात चक्रवर्ती प्रजायते चिरायुर्धनवान्भोगी दानवान्धर्मवत्सलः । सहस्रनामपठनात्पापं नश्येत्त्रिधा कृतम् अथ किं बहुनोक्तेन शृणु गुह्यञ्च मे सुत !। दामोदरेति नाम्नावै भवेत्प्रीतिर्ममाऽतुला गुणसम्बन्धि मन्नाम कृतंमात्रा यशोदया । यदामेदधिभाण्डस्यस्फोटनंगोकुलेकृतम् तदा यशोदया गाढम्बद्धो दाम्ना ह्युलूखले । ततः प्रभृति मे नाम ख्यातं दामोदरेतिच नमो दामोदरायेति जपेद्यः सुसमाहितः । सूर्योदये शुचिर्भूत्वा त्रिसहस्रं दिनेदिने ॥ सार्द्धलक्षत्रयं यावत्तत उद्यापयेद्बुधः । तर्पणं हवनं चैव ब्रह्मभोज्यं दशांशतः ॥ २६

एवं यः कुरुते भक्त्या तस्य यच्छामि वाञ्छितम् ।
धनं धान्यं तथा दारान्पुत्रांश्चाऽन्यच्च वाञ्छितम् ॥ २७ ॥

त्रिसत्येन मया चोक्तं श्रद्धत्स्व त्वं महामते !। मन्त्रराजमिमम्पुत्रकृपयामेप्रकाशितम् दामोदरायेति पठन्नित्यं कुर्यात्प्रदक्षिणम् । दण्डपातं तथा पुत्र! अष्टाङ्गेनसमन्वितम्

पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा तथा ।
मनसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग उच्यते ॥ ३० ॥

शिरोमत्पादयोःकृत्वाबाहुभ्याञ्चपरस्परम् । प्रपन्नं पाहिमामीशभीतंमृत्युग्रहाऽर्णवात् पश्चाच्छेषां मया दत्तां शिरस्याधाय सादरम् । एवं ब्रूयात्ततो वत्स! ममपूजाप्रपूर्त्तये मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन !। यत्पूजितंमयादेव! परिपूर्णं तदस्तु मे॥३२ मृदङ्गवाद्येन समं प्रणवेन सुसंयुतम् । एवं कार्यं सहोमासे नृत्यं पुण्यप्रदं नृणाम् ॥ गीतं वाद्यञ्च नृत्यञ्च तथापुस्तकवाचनम् । पूजाकाले चतुर्वक्त्र! सर्वदा ममच प्रियम् गीतवाद्याद्यभावे च ममनामसहस्रकम् । स्तवराजं तथा पुत्र! गजेन्द्रस्यच मोक्षणम् अनुस्मृतिश्च गीता च स्तवनं पञ्चधा मतम् । पञ्चस्तवं महाभाग! ममप्रीतिकरंपरम् पादोदकम्पिबेद्योवै शालग्रामसमुद्भवम् । पञ्चगव्यसहस्रैस्तुप्राशितैः किम्प्रयोजनम् शालग्रामशिलातोयंयःपिबेद्बिन्दुनासमम् । मातुःस्तन्यंपुनर्नैवसपिबेन्मुक्तिभाङ्नरः अशौचंनैव विद्येत सूतके मृतकेऽपि च । येषां पादोदकं मूर्ध्नि प्राशनं ये प्रकुर्वते ॥

अन्तकालेऽपि यस्यैदं दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारबहिष्कृतः ॥ ४१ ॥

अपेयं पिबते यस्तु भुङ्क्ते यश्चाप्यभोजनम् । अगम्यागमनो योवैपापाचारश्च यो नरः

सोऽपि पूतो भवत्याशु सद्यः पादाम्बुधारणात् ।
चान्द्रायणात्पादकृच्छ्रादधिकम्पादयोर्जलम् ॥ ४३ ॥

अगुरुं कुङ्कुमं वाऽपि कर्पूरञ्चाऽनुलेपनम् । ममपादाम्बुसंस्पृष्टं तद्धै पावनपावनम् ॥ दृष्टिपूतन्तु यत्तोयम्भवेद्धि विप्रसत्तम !। तद्धैपापहरं नृणां किम्पुनः पादयोर्जलम् ॥ प्रियस्त्वं मेऽग्रजः पुत्रोविशेषेण च मत्प्रियः । तदर्थंकथितंसर्वंरहस्यंयच्चमेस्थितम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीयेवैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे पूजाविधिसमापनन्तदुद्यापनन्तत्फल-कथनयोगो नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

एकादशीमाहात्म्यवर्णनम्

ब्रह्मोवाच

एकादश्याश्च माहात्म्यं मूर्तीनाञ्च विधानकम् । सर्वंब्रूहिममस्वामिन्कृपयाभूतभावन

श्रीभगवानुवाच

शृणुष्वद्विजशार्दूल! कथांपापप्रणाशिनीम् । यांश्रुत्वायातिविलयंपापंब्रह्मवधादिकम् काम्पिल्ये नगरे राजा वीरबाहुरिति स्मृतः । सत्यवादी जितक्रोधोब्रह्मज्ञोममतत्परः भाववान्स दयाशीलो रूपवान्बलवान्नरः । भक्तो भागवतानाञ्च सदा मम कथारुचिः

सदा मम कथाऽऽसक्तः सदा जागरणप्रियः ।
दाता विद्वान्क्षमाशीलो विक्रमी विजितेन्द्रियः ॥ ५ ॥

विजयी रणशीलश्च ऋद्ध्या च धनदोपमः। पुत्रवान्पशुमांश्चैव स्वदारनिरतस्तथा॥
तस्य भार्या कान्तिमतीरूपेणाऽप्रतिमाभुवि। पतिव्रतामहासाध्वीममभक्तिरतासदा
तया सह विशालाक्षो बुभुजे मेदिनींयुवा। मुक्तवैकंमांमहाबाहो नान्यज्ञानातिदैवतम्
एकस्मिन्दिवसे पुत्र! भारद्वाजो महामुनिः। समागतो गृहे तस्य वीरबाहोर्महात्मनः
दृष्ट्वा समागतं दूराद्भारद्वाजं महामुनिम्। स्वागतं कारयामास दत्त्वार्घ्यं विधिवत्तदा
आसनं कल्पयामास स्वयमेव महीपतिः। प्रणम्य परया भक्त्या तस्थौ मुनिवराग्रतः

राजोवाच

अद्य मे सफलं जन्म अद्य मे सफलं दिनम्। अद्यमे सफलं राज्यमद्य मे सफलं गृहम्
प्रसन्नोममविप्रर्षे परमात्मा जनार्दनः। यस्त्वं समागतो ह्यद्यगृहे योगिवरस्तथा
मुक्तोऽहं पापकोट्याऽद्य यस्त्वयाऽहं निरीक्षितः।
राज्यं लक्ष्मीर्गजाऽश्वाश्च मया तुभ्यं निवेदिताः॥ १४॥
वैष्णवोऽसि मुनिश्रेष्ठ! नास्त्यदेयं मया तव। मेरुतुल्यंभवेत्सर्वंवैष्णवस्यवराटिका
नाऽऽयाति हि गृहेयस्यवैष्णवो वैद्विजोत्तमः। तद्दिनंविफलं तस्यकथितंब्राह्मणैर्मम
विष्णुभक्ताश्च ये केचित्सर्वे वर्णाद्विजातयः। कथितं ममगार्ग्येणगौतमेनसुमन्तुना
ये त्वभक्ता हृषीकेशे पिशाचास्ते हि मानवाः। महापातकलिप्तास्तेयेभुञ्जन्तिहरेर्दिने
शिवव्रतसहस्रैस्तु सौरैर्ब्राह्मैश्च कोटिभिः। यत्फलं कविभिः प्रोक्तंवासरं केनतद्धरेः
गर्वमुद्वहतेतावत्तिथिर्ब्राह्मीच शाङ्करी। यावन्नायाति विप्रेन्द्र द्वादशी च मम प्रिया
तावत्प्रभावस्ताराणां यावन्नोदयते शशी। तिथिस्तथाचविप्रेन्द्र यावन्नायातिद्वादशी
नारदेन पुराप्रोक्तं वसिष्ठेन ममाऽग्रतः। त्वं वेत्ता सर्वधर्माणां वैष्णवानांमहामुने!

भारद्वाज उवाच

साधुपृष्टं महाभाग! यस्त्वंभक्तोऽसि वैष्णवः। सासुप्रजामहीधन्यायस्त्वंरक्षसिभूमिप!
तस्मिन्राष्ट्रे न वस्तव्यं यत्र राजा न वैष्णवः। वरं वासो वनेतीर्थेनतुराष्ट्रे त्ववैष्णवे
यत्रभागवतोराजासम्प्रशास्तिचमेदिनीम्। वैकुण्ठमितिमन्तव्यंतद्राष्ट्रम्पापवर्जितम्
चक्षुर्हीनं यथा देहं पतिहीना यथा स्त्रियः। द्वादशी दशमीयुक्तातथा राष्ट्रमवैष्णवम्

यथा पुत्रो महीपाल मातापित्रोरपोषकः। द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्
दानहीनो यथा राजा ब्राह्मणो रसविक्रयी।
द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्॥ २८॥
दन्तहीनो यथा हस्ती पक्षहीनो यथा खगः। द्वादशी दशमीयुक्तातथाराष्ट्रमवैष्णवम्
प्रतिग्रहार्थं वेदादि द्रव्यार्थं सुकृतं यथा। द्वादशी दशमी युक्तातथाराष्ट्रमवैष्णवम्
दर्भहीना यथा सन्ध्या यथा श्राद्धमदक्षिणम्।
द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्॥ ३१॥
सशिखश्च यथा शूद्रः कपिलाक्षीरपायकः। द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्
शूद्रश्च ब्राह्मणीगामी हेमघ्नो धर्मदूषकः। द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्
हरिसूर्यादि वृक्षाणां यथा छेदो नरोत्तम!। द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्
यथाऽऽहुतिर्मन्त्रहीना मृतवत्सापयो यथा। द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम्
सकेशा विधवा यद्वद्व्रतं स्नानविवर्जितम्। द्वादशीदशमीयुक्तातथा राष्ट्रमवैष्णवम्
स राजा प्रोच्यते सद्भिर्योभक्तोमधुसूदने। तद्राष्ट्रं वर्धते नित्यं सुखी भवति सप्रजः
दृष्टिर्मेसफलाराजन्यन्मयात्वं निरीक्षितः। अद्य मे सफला वाणी जल्पतेयात्वयासह
दूरमेव हि गन्तव्यं श्रूयते यत्र वैष्णवः। दर्शनात्तु भवेत्पुण्यं तीर्थस्नानसमुद्भवम्॥
स त्वं राजन्मया दृष्टो विष्णुभक्तिरतः शुचिः।
स्वस्ति तेऽस्तु गमिष्यामि सुखी भव नराधिप!॥ ४०॥
एतस्मिन्नन्तरे राज्ञ्या कान्तिमत्यानमस्कृतः। भारद्वाजोमुनिश्रेष्ठःप्रवरःसर्वयोगिनाम्
अवैधव्यं वरारोहे! भक्ताभव स्वभर्त्तरि। निश्चला केशवे भक्तिः सदा भवतु ते शुभे॥
एतस्मिन्नन्तरे राजा भरद्वाजं महामुनिम्। उवाच प्रीणयन्वाचा मेघनादगभीरया॥

राजोवाच

विपुला मे कथं लक्ष्मीः किं कृतं पूर्वजन्मनि। सर्वम्ब्रूहि मुनिश्रेष्ठ! कृपार्यदिममोपरि
एतन्मया कथं प्राप्तं राज्यं निहतकण्टकम्। पुत्रो वै गुणवाञ्छ्रेष्ठः प्रियाचसुमनोहरा
मच्चित्ता मद्गतप्राणा चिन्तयन्ती जनार्दनम्।

कोऽहं मुने ! कथञ्चैषा कश्च धर्मो मया कृतः ॥ ४६ ॥

किञ्चाऽनयाऽपिचार्वङ्ग्याममपत्न्याकृतम्मुने । केनपुण्येन मेलक्ष्मीर्मृत्युलोकेसुदुर्लभा ॥ अशेषा भूमिपालावै वर्तन्ते यस्य मे वशे । विक्रमश्चाऽप्रतिहतं शरीरारोग्यता तथा ॥ ममाऽपि विपुलंतेजो नकश्चित्सहतेमुने !। इच्छाम्यद्य प्रतिज्ञातुं यथा श्रेयमनिन्दिता ।

मयाऽपि सुकृतं विप्र! किं कृतं पूर्वजन्मनि ।

इति पृष्टो नरेन्द्रेण पूर्वजन्मविचेष्टितम् ॥ ५० ॥

स्वपत्न्याश्चेष्टितञ्चैव सम्पदाञ्चैवकारणम् । योगोत्थं सुचिरंकालं तथाविन्दतमानसे विज्ञातमेतन्नृपते! पूर्वजन्मविचेष्टितम् । तव पत्न्याश्च राजर्षे ! शृणुष्व कथयाम्यहम्

भारद्वाज उवाच

शृणु भूपाल सकलंयस्येदं कर्मणःफलम् । त्वमासीः शूद्रजातौ योजीवहिंसापरायणः नास्तिको दुष्टचारित्रः परदारप्रधर्षकः । कृतघ्नो दुर्विनीतश्च सुष्ठ्वाचारविवर्जितः ॥ इयं वा भवतो भार्यापूर्वमप्यायतेक्षणा । कर्मणामनसा वाचा नान्यदस्यास्त्वयाविना पतिव्रता महाभागा भजमाना निरन्तरम् । भावं न कुरुते दुष्टं तवोपरि तथा सति !

सखिभिस्त्वं परित्यक्तो बन्धुभिः पापकर्मकृत् ।

क्षयं जगाम चाऽर्थो यः सञ्चितस्तव पूर्वजैः ॥ ५७ ॥

नष्टे द्रव्ये फलाऽऽकाङ्क्षी त्वमासीर्जगतीपते !।

पूर्वकर्मविपाकेन कृषिश्च विफला गता ॥ ५८ ॥

ततो वित्ते परिक्षीणे परित्यक्तश्च बान्धवैः ।

क्षीयमाणाऽपि साध्वीयमत्यजत्त्वां न भामिनी ॥ ५९ ॥

त्वं भगःसर्वकामेभ्योगतवान्निर्जनेवने । हत्वाजीवाननेकांश्च चकाराऽऽत्मविपोषणम् एवं प्रवृत्तस्य तव सह पत्न्या तदा नृप । गतानि बहुवर्षाणि पापवृत्त्या महीतले ॥ अन्यस्मिन्वासरेराजन्मार्गभ्रष्टोमहामुनिः । न दिशंविदिशम्वेत्ति देवशर्माद्विजोत्तमः क्षुत्तृषापीडितोऽत्यर्थं मध्याह्नगदिवाकरे । पतितो वनमध्ये तु मार्गभ्रष्टो महीपते !॥ दया जाता च ते भूप दृष्ट्वा दुःखेन पीडितम् । ब्राह्मणं वृद्धमज्ञातं गृहीत्वातु करेण वै

उत्थाप्य पतितम्भूमौ त्वयोक्तंहितदानृप । प्रसादंकुरुविप्रर्षेआगच्छत्वंममाऽश्रमम् जलपूर्णं तडागञ्च पद्मिनीखण्डमण्डितम् । वृक्षैर्मनोहरैर्युक्तं फलैः पुष्पैर्मनोरमैः ॥६६ स्नात्वा सुशीतलेतोयेकृत्वाकर्मचनैत्यकम् । कुरुविप्र फलाहारं पिबवारिसुशीतलम् सुखेन कुरु विश्राममंमयासंरक्षितः स्वयम् । विप्रेन्द्र! तृप्तिपर्यन्तंवस त्वं च ममाश्रमे॥ उत्तिष्ठ त्वंद्विजश्रेष्ठप्रसादंकर्तुमर्हसि । लब्धसञ्ज्ञस्तदा विप्रः श्रुत्वाशूद्रस्यभाषितम् करे जग्राह तं शूद्रं गतो यत्र जलाशयः । उपविष्टो महाबाहो छायामाश्रित्य तत्तटे ॥ स्नानञ्चकार विधिवत्पूजयामास केशवम् । तर्पयित्वापितॄन्देवान्पपौनीरंसुशीतलम् विश्रान्तो वृक्षमूलेऽभूद्देवशर्माद्विजोत्तमः । साष्टाङ्गं मुनये कृत्वा नमस्कारंसहस्त्रिया शूद्रस्तु परयाभक्त्याप्रोवाचमुनिसन्निधौ । आवयोस्तरणार्थायअतिथिस्त्वंसमागतः दर्शनात्तव विप्रर्षे! जातःपापस्यसंक्षयः । प्रिये फलानिस्वादूनिप्रयच्छाऽस्मैद्विजातये

मृदूनि रसयुक्तानि सुपक्वानि प्रियाणि च ॥ ७४ ॥

ब्राह्मण उवाच

त्वामहंनैवजानामि स्वज्ञातिंकथयस्वमे । नाज्ञातस्यहिभोक्तव्यं ब्राह्मणस्याऽपिपुत्रक

शूद्र उवाच

शूद्रोऽहंद्विजशार्दूल! नकार्यःसंशयस्त्वया । आत्मजैर्दुर्जनैर्विप्र! परित्यक्तःस्वबन्धुभिः तयोः सम्वदतोरेवं शूद्रपत्न्या फलानि च । दत्तानितस्मैविप्राय तेन भुक्तानितानिवै

अभूत्प्रीतमना विप्रः पीत्वा नीरं सुशीतलम् ।

सुखं सम्प्राप्य स मुनिर्विश्रान्तस्तरुमूलके ॥ ७८ ॥

सचशूद्रःसपत्नीकोभुक्तवान्पुनरागतः । स्वागतं ते मुनिश्रेष्ठ! कुतस्त्वमिहचाऽऽगतः

शून्याटवीं द्विजश्रेष्ठ! दुष्टसत्त्वभयाकुलाम् ।

निर्मनुष्यां दुःखयुक्तां दिवारात्रभयानकाम् ॥ ८० ॥

ब्राह्मण उवाच

ब्राह्मणोऽहं महाभाग! प्रयागगमनम्प्रति । अहमज्ञायमार्गेण प्रविष्टो दारुणे वने ॥ ८१ मम पुण्यप्रभावेण जातोऽसित्वबान्धवः । जीवितं मे त्वया दत्तं ब्रूहिकिंकरवाणिते

भवानपि कुतः प्राप्तो निर्मनुष्येवनेखलु । कोभवान्कारणंकिंस्वित्कथयस्वममाऽग्रतः

शूद्र उवाच

विदर्भनगरी राज्ञा भीमसेनेन रक्षिता । वासो मम महाराष्ट्रे शूद्रोऽहं पापलम्पटः

स्वकर्मविहितो धर्मो मया त्यक्तोद्विजोत्तम ! । त्यक्तोऽहंबन्धुवर्गेणततोऽहंवनमागतः

कृत्वा जीववधं नित्यं जीवेऽहं भार्यया सह ।

साम्प्रतं पातकात्सम्यङ् निर्विण्णोऽस्मि महामुने ! ॥ ८६ ॥

कुरुष्वाऽनुग्रहं किञ्चित्पापयुक्तस्य मे प्रभो ! । मम पुण्यप्रभावेणआगतस्त्वंद्विजोत्तम

न पश्यामि यथा सौरिं पत्न्या सह महामुने ! । उपदेशप्रभावेण प्रसादं कर्तुमर्हसि

नन्यदिच्छाम्यहं किञ्चिन्मुक्त्वा देवं जनार्दनम् । कुरुष्वाऽनुग्रहं मेऽद्यप्रसादमृषिसत्तम

भारद्वाज उवाच

इति तेन समापृष्टो देवशर्मा द्विजाग्रणीः । शूद्रेण परया भक्त्या प्रहसन्वाक्यमब्रवीत्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वाद एकादश्याख्याने राज्ञःपूर्वजन्मवृत्तकथनंनामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

सराजपूर्वभववृत्तमखण्डैकादशीविधिवर्णनम्

देवशर्मोवाच

तवेदृशी मतिर्जाता सहसा केशवोपरि । एतस्मान्मे गतं पापं पूर्वजन्मशतोद्भवम्

विनाव्रतैर्विनातीर्थैर्मुक्तस्त्वंपापकोटिभिः । ममाऽऽतिथ्येनभक्त्या चजातंतवहरेःपदम्

तेन पुण्यप्रभावेण मतिर्जाता तवेदृशी । ध्यात्वा सञ्चिन्त्यमनसाज्ञातंपूर्वविचेष्टितम्

पूर्वजन्मनि विप्रस्त्वमवन्त्यां धर्मतत्परः । सदाऽध्यायनशीलश्चसुशीलश्च सदाव्रती

एका तु द्वादशी विष्णोः कृताच दशमीयुता । तत्पापस्यप्रभावेणसमस्तंसुकृतंगतम्

सर्वं तद्विफलं जतं तथा शूद्रापतिर्द्विजः । बहुवर्षसहस्राणि प्राप्ता नरकयातनाः ॥ ६ ॥

तस्मादेवं त्वयापूर्वं कृतं दुष्टं चिरं बहु । कृता तु दशमीमिश्रा तिथिर्विष्णोर्महात्मनः

तेन शूद्रो भवाञ्जातः पापे तव मतिस्तथा । धर्मे न रमते चित्तं दशमीवेधदूषितम्

विदर्भनगरे वत्स! अस्ति ते पुत्रिकासुतः । कृतं तेन विधानोक्तं हरेरेकादशीव्रतम्

प्रदत्तं तेन तत्पुण्यमखण्डैकादशीव्रतम् । धर्मोपरि मतिर्जाता जातः पापस्य सङ्क्षयः

तेन पुण्यप्रभावेण एकादश्या व्रतेन च । दशमीवेधजं पापं यमेन परिमार्जितम्

इह जन्मनि यत्पापं जन्मायुतकृतानि च । मार्जितानि यमेनैव पापानि तव साम्प्रतम्

तयोर्विवदतोरेवं विष्वक्सेनः समागतः । वर्णावर स्वागतं ते तुष्टस्तेऽहं जनार्दनः

विप्रस्याऽऽतिथ्यहेतुत्वाज्जातः पापस्यसङ्क्षयः । परदत्तेन पुण्येन एकादश्या व्रतेनच

दशमीवेधजं पापं तव शूद्र लयं गतम् । व्रतं कृत्वा ददौ पुण्यं दौहित्रस्तेनतारितः

पत्न्या सह महाभाग! वैनतेयं समारुह । इत्युक्त्वा देवदेवेन विमाने स्थापितस्तदा

स्वर्गं ततः सपत्नीकः शूद्रत्वेन नृपोत्तम ! । देवशर्मा तु विप्रो वै तीर्थराजं ययौपुनः

एतत्ते सर्वमाख्यातं यत्त्वया परिपृच्छितम् ।

अखण्डैकादशीपुण्यात्प्राप्तस्याऽऽतिथ्यकारणात् ॥

विष्णुभक्तिमती भार्या राज्यं निहतकण्टकम् ॥ १८ ॥

राजोवाच

ब्रह्मन्नखण्डैकादश्या विधिंसम्यक्समादिश । विष्णोःसम्प्रीणनार्थायप्रसादंकर्तुमर्हसि

ऋषिरुवाच

शृणुष्वनृपशार्दूलएकादश्याविधिंशुभम् । पुराऽऽसीद्भगवान्विष्णुर्नारदाययदुक्तवान्

तत्तेऽहं सम्प्रवक्ष्यामि उद्यापनविधिं शुभम् । मार्गशीर्षादिमासेषु द्वादशीषु नरोत्तम

व्रतं शुभमिदं कार्यमखण्डैकादशीव्रतम् । दशम्याञ्चैव नक्तञ्च एकादश्यामुपोषणम्

द्वादश्यामेकभुक्तञ्च अखण्डा इति कथ्यते ! दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे

तद्धि नक्तं विजानीयान्न नक्तं निशि भोजनम् ।
कांस्यं मांसं मसूरांश्च चणकान्कोद्रवांस्तथा ॥ २४॥

शाकं मधु परान्नञ्च पुनर्भोजनमैथुने । विष्णुभक्तो नरो वाऽपि दशम्यां दशवर्जयेत् दशम्या विधिरुक्तोऽयमेकादश्यास्तथाश्रृणु । असकृज्जलपानञ्च हिंसा शौचमसत्यता ताम्बूलं दन्तकाष्ठञ्च दिवा शयनमैथुने । द्यूतं क्रीडा निशि स्वापःपतितैःसहभाषणम्

एकादश्यां दशैतानि विष्णुभक्तस्तु वर्जयेत् ॥ २७॥

अद्यमेस्त्रीसुखंनास्तिभोजनंनास्तिकेशव । प्रीत्यर्थं तव देवेश नियमस्तु दिवानिशि सुप्तेन्द्रियैस्तु वक्तव्यं भोजनं यच्च मैथुनम् । दन्तान्तरविलग्नान्नं क्षमस्वपुरुषोत्तम उपावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह । उपवासःसविज्ञेयोनशरीरस्यशोषणम् पूर्वोक्तानि दशैतानि परान्नं चतथामधु । द्वादश्यांविष्णुभक्तोवैवर्जयेन्मर्दनादिकम् अद्य मे द्वादशी पुण्या पवित्रा पापनाशिनी । पारणञ्च करिष्यामि प्रसीदगरुडध्वज

विष्णोः सन्तोषणार्थाय यो मया नियमः कृतः ।
अद्याऽहं भोजयिष्यामि त्वत्प्रसादाद्द्विजोत्तमम् ॥ ३३ ॥

अनेन विधिना कुर्याद्यावद्वर्षं समाप्यते । सम्पूर्णे तु ततो वर्षे कुर्यादुद्यापनं बुधः आदौ मध्येतथाचान्तेव्रतस्योद्यापनंस्मृतम् । उद्यापनंनकुर्याद्यःकुष्ठीचान्धश्चजायते तस्मादुद्यापनं कुर्याद्यथाविभवसारतः । क्रियते शुक्लपक्षे च मासे मार्गशिरे शुभे

आमन्त्र्य द्वादशमितान्ब्राह्मणान्विधिकोविदान् ।
त्रयोदशं सपत्नीकमाचार्यं विधिकोविदम् ॥ ३७॥
यजमानः शुचिः स्नात्वा श्रद्धायुक्तो जितेन्द्रियः ।
पादशौचार्घवस्त्राद्यैराचार्यादींस्ततोऽर्चयेत् ॥ ३८ ॥

आचार्यस्तु ततः कृत्वा मण्डलम्वर्णकैःशुभैः । चक्राब्जंसर्वतोभद्रंश्वेतवस्त्रेणवेष्टितम् जलपूर्णंच कुम्भं तु पञ्चरत्नसमन्वितम् । पञ्चपल्लवसंयुक्तं कर्पूरागुरुवासितम् ॥ ४० वेष्टितं रक्तवस्त्रेण ताम्रपात्रेण संयुतम् । वेष्टितं पुष्पमालाभिर्मण्डलोपरि विन्यसेत् तस्योपरि न्यसेद्देवं लक्ष्मानारायणं नृप !। सौवर्णी प्रतिमाकार्या एककर्षप्रमाणतः॥

वाहनाऽऽयुधसंयुक्ताप्रमाणञ्चतुरङ्गुलम् । किम्वाशक्तयाप्रकुर्वीतवित्तशाठ्यम्विवर्जयेत् ततः संस्थापयेन्मूर्ति मण्डले द्वादशैव हि । मासानामधिपः पूज्यश्चाखण्डव्रतहेतवे ॥

मण्डलात्पूर्वदिग्भागे शङ्खं संस्थापयेच्छुभम् ।
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥
निर्मितः सर्वदेवैस्त्वं पाञ्चजन्य! नमोऽस्तु ते ॥ ४५॥

ततस्तुस्थण्डिलंकार्यं मण्डलादुत्तरां दिशम् । सङ्कल्प्यहवनंकार्यंमन्त्रैर्वेदोक्तवैष्णवैः स्वस्थानेस्थापयेद्विष्णुंस्थापयेच्चहरिंप्रति । पूजयेत्पुरुषसूक्तेनमन्त्रैःपौराणिकैःशुभैः नैवेद्यार्थञ्च वै कार्या मोदका बहवोऽपि च । धूपदीपोपहाराणि कृत्वा नीराजनं ततः यक्षकर्दमेन सम्पूज्य ततः कुर्यात्प्रदक्षिणाम् । स्वस्तिवाचनकैर्विप्रैर्नमस्कारं ततोनृप ततस्तु ब्राह्मणैः कार्यआचार्यक्रमशो जपः । जपश्च पावमानीयो मण्डलब्राह्मणं मधु तेजोऽसि शुक्रजं वाच्चंब्रह्मसामादनन्तरम् । पवित्रवन्तंसूर्यस्यविष्णोर्महसिसंहिताम् जपान्ते कलशे विष्णुं सोपाङ्गमुपरि न्यसेत् । दिवसस्योदये चैवहोमंकुर्यादनुक्रमम् संस्थाप्य प्रथमं पात्रम्पूजयित्वा विधानतः । स्तवनञ्च ततो होमः कर्तव्यश्चरुपूर्वकः स्वगृह्योक्तविधानेन यजनाग्निक्रियापरः । चरुद्वयञ्च कुर्वीत पायसं वैष्णवं चरुम् ॥ जुहुयात्पुरुषसूक्तेन चरोः षोडश चाऽऽहुतीः । तथा चतुर्गृहीतेन घृतयुक्तांवराहुतिम् प्रादेशमात्राः पालाशसमिधश्चघृतप्लुताः । इदं विष्णिवतिमन्त्रेणहोतव्याःकर्मसिद्धये शतमेकं तु जुहुयाद्द्विगुणाश्च तिलाऽऽहुतीः । कृते च वैष्णवे होमेग्रहयज्ञंसमारभेत्

समिद्भिश्चरुहोमञ्च तिलहोमं क्रमेण तु ।
उभयोः स्वस्तिकं वाच्यं ततः पूजां समाचरेत् ॥ ५८ ॥

ऋत्विजां चततोदद्याद्धेन्वादिग्रहदक्षिणाः । देवस्यतृप्त्यैदद्याच्चब्राह्मणाययथाविधि गां वै पयस्विनीं दद्याद्वृषभञ्च सुशोभनम् । ब्राह्मणानां ततोदद्यात्त्रयोदशपदानिच आचार्यं तु सपत्नीकं वस्त्रैश्च परितोषयेत् । तोषयित्वा महादानैस्तं सार्थञ्चसमर्पयेत् पञ्चविंशतिकुम्भांश्च सोदकान्वस्त्रवेष्टितान् । ब्राह्मणांश्चततो दद्यात्कृतेपारणके निशि भूरिदानञ्चदातव्यं बन्धूनामिष्टभोजनम् । पूर्णपात्रं ततो दद्यादाचार्याय सदक्षिणम् ॥

पूर्णपात्रप्रदानेन कार्यं सम्पूरितं भवेत्। उपवासव्रतश्चैव स्नानं तीर्थफलं भवेत् ॥६४
विप्रैःसम्भावितं तस्यसम्पूर्णंतद्भवेत्फलम्। वित्तशक्तिर्गृहेनास्तिकृतश्चैकादशीव्रतम्
स्वशक्त्या चैव कर्तव्यं तथा चोद्यापनादिकम्।
एतत्ते सर्वमाख्यातमखण्डैकादशीव्रतम् ॥ ६६ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमासमाहात्म्ये ब्रह्मविष्णुसम्वादेऽखण्डैकादशीव्रतकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

सषड्विंशतिगुणयुक्तजागरणवर्णनमेकादशीमाहात्म्यम्

श्रीभगवानुवाच

शृणुपुत्र! प्रवक्ष्यामि जागरस्य च लक्षणम्। येनविज्ञातमात्रेणसुलभोऽहंसदा कलौ
गीतं वाद्यञ्च नृत्यञ्च पुराणपठनं तथा। धूपं दीपश्च नैवेद्यं पुष्पं गन्धानुलेपनम् ॥२॥
फलार्पणञ्च श्रद्धां च दानमिन्द्रियसंयमम्। सत्यान्वितंविनिद्रञ्चमुदामयजनान्वितम्
साश्चर्यं चैवसोत्साहं पापालस्यादिवर्जनम्। प्रदक्षिणासमायुक्तं नमस्कारपुरःसरम्
नीराजनसमायुक्तमतिहृष्टेन चेतसा। यामेयामे महाभाग ! कुर्यादारार्तिकं मम ॥ ५
षड्विंशद्गुणसंयुक्तमेकादश्यां च जागरम्। यः करोति नरोभक्तयानपुनर्जायते भुवि
य एवं कुरुते भक्तया वित्तशाठ्यविवर्जितः। जागरं परया भक्तयासलीनोजायते मयि
दष्टाः कलिभुजङ्गेन स्वपन्तेये दिने मम। कुर्वन्ति जागरं नैव मायापाशविमोहिताः
प्राप्ताप्येकादशीयेषां कलौ जागरणं विना। ते विनष्टानसन्देहोयस्माज्जीवितमध्रुवम्
उद्धृतं नेत्रयुग्मञ्च दत्त्वा वै हृदये पदम्। कृतं ये नैव पश्यन्ति पापिनो ममजागरम्

अभावे वाचकस्याऽथ गीतं नृत्यञ्च कारयेत्। वाचके सति देवेश पुराणंप्रथमं पठेत्
अश्वमेधसहस्रस्य वाजपेय शतस्य च। पुण्यं कोटिगुणं पुत्र मम जागरणे कृते ॥
पितृपक्षे मातृपक्षे भार्यापक्षे च मानद !। कुलान्युद्धरते चैतन्मम जागरणे कृते ॥१३॥
उपोषणदिने विघ्ने प्रारब्धे जागरे सति।
विहाय स्थानं तत्राऽहं शापं दत्त्वा व्रजाम्यहम् ॥ १४ ॥
अविद्धवासरे ये मे प्रकुर्वन्ति हि जागरम्। तेषां मध्येप्रहृष्टः सन्नृत्यंवैप्रकरोम्यहम्
यावद्दिनानि कुरुते जागरं मम सन्निधौ। युगाऽयुतानि तावन्ति वसते ममवेश्मनि
न गयापिण्डदानेन न तीर्थैर्बहुभिर्मखैः। पूर्वजा मुक्तिमायान्ति विनैकादशिजागरात्
यः कुर्याज्जागरे पूजां कुसुमैर्मम वासरे। पुष्पेपुष्पेऽश्वमेधस्य फलमाप्नोति मानवः
यः कुर्याद्दीपदानञ्च रात्रौ जागरणे मम। निमिषे निमिषे पुत्र! लभते गोऽयुतं फलम्
यो दद्याज्जागरे पुत्र! हविष्यान्नसमुद्भवम्। नैवेद्यं लभते पुण्यं शालिशैलसमुद्भवम् ॥
पक्वान्नानि च यो दद्यात्फलानि विविधानि च। जागरेमेचतुर्वक्त्रलभतेगोशतंफलम्
कर्पूरेण च ताम्बूलं ददाति मम जागरे। मद्भक्तो मत्प्रसादेन सप्तद्वीपाऽधिपो भवेत्
जागरे मम देवेश यः कुर्यात्पुष्पमण्डपम्। स पुष्पकविमानेन क्रीडते मम सद्मनि ॥
जागरे मे तु यो धूपं सकर्पूरं सगुग्गुलम्।
ददाति दहते पापं जन्मलक्षसमुद्भवम् ॥ २४ ॥
स्नापयेज्जागरे यो मां दधिक्षीरघृताम्बुभिः। भोगानिह लभेद्वैस ह्यन्तेच परमांगतिम्
दिव्याऽम्बराणि यो दद्यात्फलानि विविधानि च।
स चिरम्वसते स्वर्गे तन्तुसंख्यासमानि वै ॥ २६ ॥
दद्यादाभरणं यो मे हेमजं रत्नसम्भवम्। सप्तकल्पान्निवसते मदुत्सङ्गे प्रियो मम
घृतेन दीपकं यो मे गव्येन च विशेषतः। ज्वालयेज्जागरेरात्रौ निमिषे गोयुतज्फलम्
जागरे मे चतुर्वक्त्र! कर्पूरेण च दीपकम्। योज्वालयेत्तनीराजंकपिलादानजम्फलम्
यः पुनः कुरुते दीपं गीतं नृत्यञ्च पूजनम्। शतक्रतुसमं पुण्यं व्रतैर्दानशतैरपि ॥३०॥
स्वयं यः कुरुते गीतं विलज्जोनृत्यतेयदि। स लभेन्निमिषार्धेन कोटियज्ञकृतम्फलम्

निवारयति यो गीतं नृत्यं जागरणे मम । षष्टियुगसहस्राणि पच्यते रौरवादिषु ॥ नृत्यमानस्य मर्त्यस्य ये केचिन्निकटेगताः । विमुक्ताधर्मराजेन मुक्तायान्तिचमत्पदम् नृत्यमानस्य मर्त्यस्य उपहासं करोति यः । जागरे याति निरयं यावदिन्द्राश्चतुर्दश जागरेममयःकुर्याद्भक्त्यापुस्तकवाचनम् । श्लोकसंख्यायुगान्येव स वसेन्ममसन्निधौ प्रदक्षिणाप्रदानेन यत्फलं कथितम्बुधैः । न तत्कोटिमखैः पुण्यं युगसङ्ख्यैरवाप्यते दीपमालां ममाग्रे वै यः कुर्याज्जागरे सुत !। विमानकोटिसंयुक्त आकल्पम्वसतेदिवि मम बालचरित्राणि जागरे पठते हि यः । युगकोटिसहस्राणि श्वेतद्वीपे वसेन्नरः ॥

तस्माज्जागरणं कार्यं पक्षयोः शुक्लकृष्णयोः ॥ ३६ ॥

योगीताम्पठतेरात्रौ ममनामसहस्रकम् । वेदोक्तानांपुराणानां जागरात्पुण्यमाप्नुयात् धेनुदानं तु यः कुर्याज्जागरे मम पुत्रक !। लभते नात्र सन्देहः सप्तद्वीपवतीफलम् ॥ सर्वेषामेव पुण्यानां महत्पुण्यं महीतले । द्वादशीजागरम्पुत्र प्रसिद्धं भुवनत्रये ॥४२॥ जागरं ये च कुर्वन्ति कर्मणा मनसा गिरा । न तेषां पुनरावृत्तिर्मम लोकात्कथञ्चन

प्रोत्साहयित्वा लोकान्यः कुरुते जागरं निशि ।

प्राप्नोति चक्रवर्तित्वं सत्यं मे व्याहृतं सुत! ॥ ४४ ॥

संमानिताःककुत्स्थेन रात्रौजागरकारिणः । स्वशक्त्या चैवदानेन प्राप्तंराज्यं सुदुर्लभम् ये केचिद्गायका विप्रा वादका नर्तकाश्च ये । नर्तकीसहिता यान्ति ममलोके सनातने दुर्योनिषु गतैः सर्वैः कृत्वा जागरणं मम । सम्प्राप्तं पृथिवीशत्वं कामुकैर्मुनिसत्तम!

निष्कामा मुक्तिमापन्नाः श्वपचाद्याश्च जागरात् ।

विवेको नास्ति वर्णानां मम जागरकारिणाम् ॥ ४८ ॥

न कलौ पावनं ध्यानं न कलौ जाह्नवीजलम् ।

न कलौ पावनं जाप्यं मुक्त्वैकं जागरं मम ॥ ४६ ॥

द्वादशीदिवसेप्राप्ते ये कुर्वन्तिहिजागरम् । ते धन्यास्ते कृतार्था वैकलिकालेनसंशयः न भूयान्मानुषे लोके द्वादशी विमुखोनरः । अतीतानागतान्वाऽपि पातयेन्नरके हि सः वरमेको गुणैयुक्तः किं जातैर्बहुभिः सुतैः । द्वादशीजागरात्सर्वांस्तारयेद्योहिपूर्वजान्

माहात्म्यंपठतेभक्त्यामयोक्तंजागरोद्भवम् । द्वादशीसम्भवःपुत्रःकुलानांतारयेच्छतम् अगम्यागमने पापमभक्ष्यस्यापि भक्षणे । पापम्विलयमायाति कृते जागरणे सुत !॥ अज्ञानाद्यत्कृतम्पापं ज्ञात्वायत्पातकंकृतम् । पूर्वजन्मार्जितं पापमिह जन्मनि यत्कृतम्

सिद्ध्यन्ति सर्वकार्याणि मनसाचिन्तितान्यपि ।

द्वादश्यां वै चतुर्वक्त्र रात्रौ जागरणे कृते ॥ ५६ ॥

द्वादशीजागरेणैव मुक्तिं गच्छन्ति मानवाः ॥ ५७ ॥

न तत्पुण्यं कुरुक्षेत्रे प्रयागे वसतांकलौ । माहात्म्यं वसतां पुंसां यत्फलंद्वादशीषुच नाऽश्वमेधसहस्रैस्तु तीर्थकोट्यवगाहनात् । तत्फलं प्राप्यते पुत्र द्वादशीजागरे कृते

पठेद्वा शृणुयाद्वाऽपि माहात्म्यं द्वादशीभवम् ।

सर्वपापविशुद्धात्मा स लभेच्छाश्वतीं गतिम् ॥ ६० ॥

सर्वे दुष्टाः समस्ताश्च सौम्यास्तस्य सदा ग्रहाः ।

सन्ततेर्न वियोगस्तु द्वादशी यस्य कारणम् ॥ ६१ ॥

मम कीर्तिरुचिर्नित्यं न विपद्येत कर्हिचित् । राजेराजकुले चैव सर्वदा विजयी भवेत् धर्मोपरि मतिर्नित्यं भक्तिर्मयि सुनिर्मला । पातकं नैव लिप्येतद्वादशीभक्तितोनरम् प्रेतत्वं नैव तस्याऽस्ति कृते जागरणे मम । एकादश्या विहीनस्य परलोकगतिर्नहि

तस्मात्सर्वप्रयत्नेन कलौ कार्यं हि तद्दिनम् ॥ ६४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमासमाहात्म्ये ब्रह्मविष्णुसम्वाद एकादशीव्रतजागरणफलकथनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

मत्स्योत्सवमाहात्म्यवर्णनम्

श्रीभगवानुवाच

ततः प्रभाते द्वादश्यांकार्योमत्स्योत्सवोबुधैः । मार्गशीर्षे शुक्लपक्षे यथाविध्युपचारतः
अथ मार्गशिरे मासेद्दशम्यांनियतात्मवान् । कृत्वादेवार्चनं धीमानग्निकार्यंयथाविधि

शुचिवासाः प्रसन्नात्मा हव्यमन्नं सुसंस्कृतम् ।
पक्त्वा पञ्चपदे गत्वा पुनः शौचन्तु पादयोः ॥ ३ ॥

कृत्वाऽष्टाङ्गुलमानं तु क्षीरवृक्षसमुद्भवम् । भक्षयेद्दन्तकाष्ठं तु ततश्चाचम्य यत्नतः

दृष्ट्वाऽऽकाशानि सर्वाणि ध्यत्वा वै मां गदाधरम् ।
शङ्खचक्रगदापाणिं किरीटं पीतवाससम् ॥ ५ ॥

प्रसन्नवदनाऽम्भोजं सर्वलक्षणलक्षितम् । ध्यात्वापुनर्जलं हस्तेगृहीत्वा भानुमध्यगम्
ध्यात्वाऽर्घ्यं दापयेत्तत्र करतोयेन मानवः । एवमुच्चारयेद्वाचं तस्मिन्काले चतुर्मुख !॥

एकादश्यां निराहारः स्थित्वाऽहनि परे ह्यहम् ।
भोक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाऽच्युत !॥ ८ ॥

एवमुक्त्वा ततो रात्रौ मम मूर्तेश्चसन्निधौ । जपेन्नारायणायेति स्वयं तत्र विधानतः
ततः प्रभाते विमलां नदींगत्वासमुद्रगाम् । इतराम्वातडागम्वा गृहेवानियतात्मवान्
आनीय मृत्तिकां शुद्धां मन्त्रेणाऽनेनमानवः । वन्दयेद्देवदेवेशं तदा शुद्धो भवेन्नरः ॥
धारणं पोषणं त्वत्तो भूतानां देवि! सर्वदा । तेन सत्येन मे पापं यावन्मोचय सुव्रते!

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि दैवतैः ।
तेनेमां मृत्तिकां स्पृष्टामाऽऽलभामि त्वयोद्धृताम् ॥ १३ ॥
त्वयि नित्यं रसाः सर्वे स्थिता वरुण ! सर्वदा ।
तेनेमां मृत्तिकां प्लाव्य पूतां कुरुष्व मा चिरम् ॥ १४ ॥

एवं मृदं तथा तोयं प्रसाद्याऽऽत्मानमालभेत् ।
त्रिःकृत्वाऽशेषमृदया पिण्डमालिप्य वै जले ॥ १५ ॥

तस्मिन्नरः सदासम्यङ्नक्रकच्छपदूरतः । स्नात्वाचावश्यकं कृत्वा पुनर्मम गृहम्व्रजेत्
तत्राऽऽराध्य महायोगिनदेवं नारायणंहरिम् । केशवायनमःपादौकटिं दामोदराय च
जानुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे । कण्ठेकौस्तुभनाभाय वक्षः श्रीपतये तथा
त्रैलोक्यविजयायेति बाहुं सर्वात्मने शिरः । रथाङ्गधारिणेवक्त्रं श्रीकरायेतिवारिजम्
गम्भीरायेति च गदामम्भोजं शान्तमूर्तये । एवमभ्यर्च्य देवेशं देवं नारायणम्प्रभुम् ॥

पुनस्तस्याऽग्रतः कुम्भांश्चतुरः स्थापयेद् बुधः ।
जलपूर्णान्समाल्यांश्च सितचन्दनलेपितान् ॥ २१ ॥

चूतपल्लवसंयुक्तान्सितवस्त्रावगुण्ठितान् । छादितांस्ताम्रपात्रैश्च तिलपूर्णैश्च काञ्चनैः
चत्वारस्तु समुद्राश्चकलशाःसम्प्रकीर्तिताः । तेषांमध्येशुभम्पीठंस्थापयेद्वस्त्रगर्भितम्
तस्मिन्सुवर्णं रौप्यं वा ताम्रंवा दारवंतथा । अलाभेसर्वपात्राणांपालाशंपात्रमिष्यते

तोयपूर्णञ्च तत्कृत्वा तस्मिन्पात्रे ततो न्यसेत् ।
सौवर्णं मत्स्यरूपञ्च कृत्वा देवं जनार्दनम् ॥ २५ ॥

देवदेवाङ्गसंयुक्तं श्रुतिस्मृतिविभूषितम् । तत्राऽनेकविधैर्भक्ष्यैःफलैःपुष्पैश्चशोभितम्
गन्धैर्धूपैश्च वस्त्रैश्च अर्चयित्वा यथाविधि । रसातलगता वेदायथादेव त्वयोद्धृताः
मत्स्यरूपेण तद्वन्मां भवादुद्धर केशव !। एवमुच्चार्य तस्याऽग्रे जागरं तत्र कारयेत्
यथाविभवसारेण प्रभाते विमले तथा । चतुर्णां ब्राह्मणानाञ्च चतुरो दापयेद्घटान् ॥
पूर्वञ्च बह्वृचे दद्याच्छान्दोग्ये दक्षिणं तथा । यजुःशाखान्वितेदद्यात्पश्चिमंघटमुत्तमम्
उत्तरं कामतो दद्यादेष एव विधिः स्मृतः । ऋग्वेदः प्रीयतां पूर्वे सामवेदस्तु दक्षिणे
यजुर्वेदः पश्चिमतो ह्यथर्वश्चोत्तरेण तु । अनेन क्रमयोगेन प्रीयतामिति वाचयेत् ॥३२
मत्स्यरूपं तुसौवर्णमाचार्यायनिवेदयेत् । गन्धधूपादिवस्त्रैस्तुसम्पूज्यविधिवत्क्रमात्
यस्त्विमं सरहस्यञ्चमन्त्रेणैवोपपादयेत् । विधानंविधिवद्दत्त्वादाताकोटिगुणोत्तरम्
प्रतिपाद्यगुरुं यस्तु मोहाद्विप्रतिपद्यते । स जन्मकोटिंनरके पच्यते पुरुषाधमः ॥ ३५

विधानस्य प्रदाता यो गुरुरित्युच्यते बुधैः । एवंदत्वाविधानेनद्वादश्यांमांसमर्चयेत्
विप्राणां भोजनं दद्याद्यथाशक्त्या च दक्षिणाम् ।
भूरिणा परमान्नेन ततः पश्चात्स्वयं नरः ॥ ३७ ॥
भुञ्जीतसहितो विप्रैर्वाग्यतःसंयतेन्द्रियः । अनेनविधिनायस्तुकुर्यान्मत्स्योत्सवंनरः
तस्यपुण्यफलंचाऽग्रेशृणुसत्यवताम्वर । यदि वक्त्रसहस्राणां सहस्राणिभवन्ति हि
आयुश्च ब्रह्मणा तुल्यं लभेद्यदि महाव्रत !। तदा वै ह्यस्य धर्मस्य फलं कथयितुंभवेत्
य इमं श्रावयेद्भक्त्या द्वादशीकल्पमुत्तमम् । शृणोति वा स पापैस्तुसर्वैरेव विमुच्यते
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायांद्वितीये वैष्णवखण्डे-
मार्गशीर्षमासमाहात्म्ये ब्रह्मविष्णुसम्वादे मत्स्योत्सवकथनंनाम
चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

श्रीविष्णुप्रीत्यर्थदानभोजनादिमहत्त्ववर्णनपुरःसरंश्रीनाममाहात्म्यम्

श्रीभगवानुवाच

ये त्वया वै कृताःप्रश्नाःपूर्वंप्रश्नविदांवर । तान्वर्णयिष्येक्रमशोनिशामयसुनिश्चितम्
सहोमासे च देवो वै कीर्तियुक्तो हि केशवः । तस्य पूजाप्रकर्तव्यायथापूर्वंप्रभाषितम्
ब्राह्मणं केशवं स्मृत्वा तत्पत्नींकीर्तिमेवच । दम्पतीविधिवत्पूज्यौवस्त्राभरणधेनुभिः
दम्पती पूजितौ वत्स पूजितोऽहंनसंशयः । तस्मादवश्यंसम्पूज्यौदम्पतीममतुष्टिदौ
दानञ्चविविधं कार्यंमम तुष्टिकरं परम् । गोदानं भूमिदानञ्च स्वर्णदानं विशेषतः ॥
वस्त्रदानं तथा शय्या तथाऽलङ्करणानि च । सन्नदानं प्रकर्तव्यं मम सन्तोषकारकम्
सर्वेषामेवदानानां विशेषश्च त्रिकं स्मृतम् । वसुन्धरा तथा धेनुर्विद्यादानं तथैव च

दत्ते दानत्रिके वत्स भवेत्प्रीतिर्ममाऽतुला । तस्मान्नरैस्तुकर्तव्यंसहोमासेत्रिकंशुभम्
स्नानस्य च विधिः सम्यक्पुरैवोक्तोमयाऽनघ । पूजास्नानञ्चदानञ्चविधिरेषनसंशयः
मार्गशीर्षं समग्रं तु एकभक्तेन यः क्षिपेत् ।
भोजयेद्यो द्विजान्भक्त्या स मुच्येद्व्याधिकिल्बिषैः ॥ १० ॥
कृषिभागी बहुधनो बहुधान्यश्च जायते । किमत्र बहुनोक्तेन शृणु गुह्यं परं मम ॥११
हुतभुग्ब्राह्मणश्चैव वदनं मम मानद । ब्राह्मणाख्यं मुखं श्रेष्ठं न तथा हव्यवाहनः ॥१२
ब्राह्मणाख्ये मुखे पुत्र! हुतं कोटिगुणं भवेत् ।
अग्न्याख्यं ब्राह्मणाधीनं स्वतन्त्रा ब्राह्मणाः किल ॥ १३ ॥
सशर्करं घृतयुतं पायसं शशिसन्निभम् । होतव्यं ब्राह्मणमुखे मम तुष्टिकरं सुत ॥१४
शुमण्डलमोदककोकरसं सुत! फेनिकया घृतपूरयुतम् ।
यज विप्रमुखे मम तुष्टिकरं यदि चेच्छसि दारसुतादिसुखम् ॥ १५ ॥
कुमुदेन समप्रभसौरभदं शुभभक्तयुतं त्वथ मुद्गयुतम् ।
सुरभीकृतपुष्कलसर्पिसमं कुरु विप्रमुखे हवनं हि सहे ॥ १६ ॥
पयसा सह सर्पिषि च क्वथितं बहुखारिकचारफलैः सितया ।
सह कर्पूरनारिफलेन समं युतसीकरकं सुत! शुभ्रकरम् ॥ १७ ॥
व्यञ्जनानि च शुभ्राणि मनोज्ञानिप्रियाणिच । कर्त्तव्यानिसहोमासेब्राह्मणार्थेचतुर्मुख!
प्रियाशिखरिणीकार्या चान्यत्तेषां प्रियञ्चयत् । कृत्वैवंभोजयेद्विप्राञ्छ्रद्धयापरयासुत
रसास्वादनपूर्वं हि भुञ्जते वै यथायथा । तथातथा मम प्रीतिर्जायते भुवि दुर्लभा
तस्मात्तत्तथा कार्यं यथातुष्यन्तिब्राह्मणाः । तुष्टैस्तैश्चाऽप्यहंतुष्टोभवामीहनसंशयः
श्रद्धत्स्व त्वं चतुर्वक्त्र! न ते मिथ्या ब्रवीम्यहम् ।
एतद्गुह्यं मया प्रोक्तं श्रेयोऽर्थं तव मानद !॥ २२ ॥
आक्रोशयन्ति यदि ते अथवा प्रहरन्ति चेत् । तथापि तेनमस्यावैममप्रीत्याहिमानद
एवं कार्यं सदा पुत्र मार्गशीर्षे विशेषतः । यदुक्तं भवता ब्रह्मन्भोक्तव्यं किंशृणुष्वतत्
भोक्तव्यं मम मम चोच्छिष्टंममभक्तिपरायणैः । पवित्रकरणंपुत्रपापिनामपिमुक्तिदम्

ममाशनस्य शेषञ्च योभुनक्तिदिनेदिने । सिक्थेसिक्थेभवेत्पुण्यंचान्द्रायणशतोद्भवम्

अवशिष्टं ततोच्छिष्टं भक्तानां भोजनद्वयम् ।
नाऽन्यद्वै भोजनं तेषां भुक्त्वा चान्द्रायणं चरेत् ॥ २७ ॥

अनर्पयित्वा यो भुङ्क्ते अन्नपाकञ्च यत् । श्वानविष्ठासमं चान्नं पानञ्च मदिरासमम् तस्मान्मामर्पयेत्पुत्र अन्नपानादि चौषधम् । भक्षयेत्परयाभक्तयाअशुचेःशुचिकारकम् तीर्थयज्ञादिकफलं कलिदोषविनाशनम् । ममोच्छिष्टं सुगतिदमपि दुष्कृतकर्मणाम् अन्येषां दैवतानाञ्च न गृह्णीयाच्च भक्षितम् । अभक्तानाञ्च पक्वान्नं भुक्त्वाचनरकंव्रजेत् वक्तव्यमेव यत्प्रोक्तं तच्छृणुष्व समाहितः। कथयिष्ये तव प्रीत्या अपि गुह्यतरंमम मम नाम प्रवक्तव्यं सहे चैव विशेषतः । कृष्णकृष्णेति वक्तव्यं मम प्रीतिकरं परम् प्रतिज्ञैषा च मे पुत्र न जानन्ति सुरासुराः । मनसा कर्मणा वाचा यो मे शरणमागतः स हि सर्वमवाप्नातिकामनामिहलौकिकीम् । सर्वोत्कृष्टञ्चवैकुण्ठंमत्प्रियांकमलामपि

कृष्णकृष्णेति कृष्णेति यो मां स्मरति नित्यशः ।
जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहम् ॥ ३६ ॥
विनोदेनाऽपि दम्भेन मौढ्याल्लोभाच्छलादपि ।
यो मां भजत्यसौ वत्स! मद्भक्तोनाऽवसीदति ॥ ३७

ये वै पठन्ति कृष्णेति मरणे पर्युपस्थिते । यदि पापयुताः पुत्रनपश्यन्तियमंक्वचित् पूर्वे वयसिपापानिकृतान्यपिचकृत्स्नशः । अन्तकालेचकृष्णेतिस्मृत्वामामेत्यसंशयम् नमः कृष्णाय महते विवशोऽपि वदेद्यति । ध्रुवं पदमवाप्नोति मरणे पर्युपस्थिते श्रीकृष्णेति कृतोच्चारैः प्राणैर्यदि वियुज्यते । दूरस्थः पश्यति चतंस्वर्गतंप्रेतनायकः श्मशाने यदि रथ्यायां कृष्णकृष्णेति जल्पति । म्रियतेयदिचेत्पुत्रमामेवैतिनसंशयः दर्शनान्मम भक्तानां मृत्युमाप्नोतियःक्वचित् । विनामत्स्मरणात्पुत्रमुक्तिमेतिसमानवः पापानलस्य दीप्तस्य भयंमा कुरुपुत्रक । श्रीकृष्णनाममेघोत्थैःसिच्यतेनीरबिन्दुभिः

कलिकालभुजङ्गस्य तीक्ष्णदंष्ट्रस्य किं भयम् ।
श्रीकृष्णनामदारूत्थवह्निदग्धः स नश्यति ॥ ४१ ॥

पापपावकदग्धानां कर्मचेष्टावियोगिनाम् । भेषजंनास्तिमर्त्यानांश्रीकृष्णस्मरणंविना प्रयागे वै यथा गङ्गा शुक्लतीर्थे च नर्मदा । सरस्वती कुरुक्षेत्रे तद्वच्छ्रीकृष्णकीर्तनम् भवाम्भोधिनिमग्नानांमहापापोर्मिपातिनाम् । नगतिर्मानवानाञ्चश्रीकृष्णस्मरणंविना

मृत्युकालेऽपि मर्त्यानां पापिनां तदनिच्छताम् ।
गच्छतां नाऽस्ति पाथेयं श्रीकृष्णस्मरणं विना ॥ ४६ ॥

तत्र पुत्र! गया काशी पुष्करंकुरुजाङ्गलम् । प्रत्यहंमन्दिरेयस्यकृष्णकृष्णेतिकीर्तनम् जीवितं जन्मसाफल्यंमुखं तस्यैव सार्थकम् । सततंरसनायस्यकृष्णकृष्णेतिजल्पति सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ५२ नाम्नोऽस्य यावती शक्तिः पापनिर्दहने मम । तावत्कर्तुं न शक्नोतिपातकंपातकीजनः नाऽपविद्धं भवेत्तस्य शरीरं नैव मानसम् । न पापंनचवैक्लव्यंकृष्णकृष्णेतिकीर्तनात् श्रीकृष्णेति वचः पथ्यं न त्यजेद्यःकलौ नरः । पापामयोवैन भवेत्कलौतस्यैवमानसे श्रीकृष्णेति प्रजल्पन्तंदक्षिणाशापतिर्नरम् । श्रुत्वामार्जयतेपापंतस्यजन्मशतार्जितम् चान्द्रायणशतैः पापंपराकाणांसहस्रकैः । यन्नापयातितद्यातिकृष्णकृष्णेतिकीर्तनात्

नान्याभिर्नामकोटीभिस्तोषो मम भवेत् क्वचित् ।
श्रीकृष्णेति कृतोच्चारे प्रीतिरेवाऽधिकाधिका ॥ ५८ ॥

चन्द्रसूर्योपरागैस्तु कोटीभिर्यत्फलं स्मृतम् ।
तत्फलं समवाप्नोति कृष्णकृष्णेति कीर्तनात् ॥ ५६ ॥

गुरुदाराभिगमनं हेमस्तेयादिपातकम् । श्रीकृष्णकीर्तनाद्याति घर्मतप्तं हिमंयथा

युक्तो यदि महापापैरगम्यागमनादिभिः ।
मुच्यते चान्तकालेऽपि सकृच्छ्रीकृष्णकीर्तनात् ॥ ६१ ॥
अविशुद्धमना यस्तु विनाप्याचारवर्तनात् ।
प्रेतत्वं सोऽपि नाप्नोति अन्ते श्रीकृष्णकीर्तनात् ॥ ६२ ॥

मुखे भवतु माजिह्वाऽसतीयातुरसातलम् । नसाचेत्कलिकालेयाश्रीकृष्णगुणवादिनी स्ववक्त्रे परवक्त्रे च वन्द्या जिह्वाप्रयत्नतः । कुरुतेयाकलौपुत्र श्रीकृष्णगुणकीर्तनम्

पापवल्लीमुखेतस्य जिह्वारूपेण कीर्त्यते । या नवक्तिदिवारात्रौश्रीकृष्णगुणकीर्तनम्

पततां शतखण्डा तु सा जिह्वा रोगरूपिणी ।

श्रीकृष्णकृष्णकृष्णेति श्रीकृष्णेति न जल्पति ॥ ६६ ॥

श्रीकृष्णनाममाहात्म्यं प्रातरुत्थाययः पठेत् । तस्याऽहंश्रेयसांदाताभवास्येवनसंशयः

श्रीकृष्णनाममाहात्म्यं त्रिसन्ध्यं हि पठेत्तु यः ।

सर्वान्कामानवाप्नोति स मृतः परमां गतिम् ॥ ६८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीयेवैष्णवखण्डे मार्गशीर्षमाहात्म्ये ब्रह्मविष्णुसम्वादे श्रीकृष्णनाममाहात्म्यवर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

भगवद्ध्यानपुरस्सरंभागवतश्रैष्ठ्यमाहात्म्यवर्णनम्

श्रीभगवानुवाच

शृणु ध्यानं चतुर्वक्त्र! वक्ष्यामि प्रीतिमानसः । श्रुतेनैवयसौभाग्यंलभतेमानवोभुवि

अथ श्रीमदुद्यानसम्वीतहैमस्थलोद्भासिरत्नस्फुरन्मण्डपान्तः ।

लसत्कल्पवृक्षोदितोद्दीप्तरत्नस्थलाधिष्ठिताम्भोजपीठाऽधिरूढम् ॥ २ ॥

महानीलनीलाभमत्यन्तबालं गुडस्निग्धवक्त्रान्तविस्रस्तकेशम् ।

अलिव्रातपर्याकुलोत्फुल्लपद्मप्रमुग्धाननं श्रीमदिन्दीवराक्षम् ॥ ३ ॥

चलत्कुण्डलोल्लासितोत्फुल्लगल्लं सुघोणं सुशोणाधरं सुस्मितास्यम् ।

अनेकोल्लसत्कण्ठभूषालसन्तं वहन्तं नखं पौण्डरीकं सुनेत्रम् ॥ ४ ॥

समुद्धूसरोरःस्थलं धेनुधूल्या सुपुष्टाङ्गमष्टापदाकल्पदीप्तम् ।

कटीरस्थले चारुजङ्घोरुयुग्मे पिनद्धं क्वणत्किङ्कणीजालदाम्ना ॥ ५ ॥

हसन्तं लसद्बन्धुजीवप्रसूनप्रभापाणिपादाम्बुजोदारकान्त्या ।

करे दक्षिणे पायसं वामहस्ते दधानं नवं शुद्धहैयङ्गवीनम् ॥ ६ ॥

महीभारभूताऽमरारातियूथाऽनलं पूतनादीन्निहन्तुं प्रवृत्तम् ।

प्रभुं गोपिकागोपवृन्देन वीतं सुरेन्द्रादिभिर्वन्दितं देवदेवम् ॥ ७ ॥

प्रगे पूजयित्वा त्वनुस्मृत्य कृष्णं भुजङ्गेन्द्रवज्रादिभिर्भक्तिनम्रः ।

सिताम्भोजहैयङ्गवीनैश्च दध्ना विमिश्रेण दुग्धेन सम्प्रीणयेत्तम् ॥ ८ ॥

इति प्रातरेवाऽर्चयेदच्युतं यो नरः प्रत्यहं शश्वदास्तिक्ययुक्तः ।

लभेत्सोऽचिरेणैव लक्ष्मीं समग्रामिह प्रेत्य शुद्धं परं धाम भूयात् ॥ ९ ॥

मन्त्रश्लोकःपुरापुत्रआदौलोकमनोहरः । श्रीमद्दामोदराख्योहि शृणुतस्याधिकारिणः अयोग्याय न दातव्यो मन्त्रराजस्त्वयासुत !। यत्नेनगोपनीयश्चरहस्यंशीघ्रसिद्धिदम् अलसंमलिनंक्लिष्टंदम्भमोहसमन्वितम् । दरिद्रं रोगिणं क्रुद्धं रागिणम्भोगलालसम् असूयामत्सरग्रस्तं शठं परुषवादिनम् । अन्यायेनाऽर्जितधनं परदाररतं सदा ॥ १३ ॥ विदुषां वैरिणं नित्यमज्ञं पण्डितमानिनम् । भ्रष्टव्रतं क्लिष्टवृत्तिं पिशुनं दुष्टमानसम् बह्वाशिनं क्रूरचेष्टमग्रगण्यं दुरात्मनाम् । कृपणं पापिनं रौद्रमाश्रितानां भयङ्करम् ॥ एवमादिगुणैर्युक्तं शिष्यं नैव परिग्रहेत् । गृह्णीयाद्यदि तद्दोषः प्रायो गुरुमुपस्पृशेत् अमात्यदोषो राजानंजायादोषःपतिंयथा । तथा शिष्यकृतोदोषोगुरुं प्राप्नोत्यसंशयम् तस्माच्छिष्यं गुरुर्नित्यं परीक्ष्यैव परिग्रहेत् । कायेन मनसा वाचा गुरुशुश्रूषणेरतम् अस्तेयवृत्तिमास्तिक्ययुक्तं मोक्षकृतोद्यमम् । ब्रह्मचर्यरतं नित्यं दृढव्रतमकल्मषम् ॥ प्रसन्नहृदयं शुद्धमशठं विमलाशयम् । परोपकारनिरतं स्वार्थे च विगतस्पृहम् ॥२०॥ स्वचित्तवित्तदेहैस्तु परितोषकरं गुरोः । आश्रितानांतथा पुत्र! परितोषकरंशुचिम्

ईदृग्विधाय शिष्याय मन्त्रं दद्यात्तु नाऽन्यथा ।

यद्यन्यथा वदेत्तस्मिन्देवताशाप आपतेत् ॥ २२ ॥

शृणु पुत्र! प्रवक्ष्यामिगुरोरपि च लक्षणम् । एभिस्तु लक्षणैर्युक्तोगुरुरेवभवेन्नृणाम्

समचेताः प्रशान्तात्मा विमन्युश्च सुहृन्नृणाम् ।
साधुर्महान्समो लोके स गुरुः परिकीर्तितः ॥ २४ ॥
मम व्रतधरो नित्यं वैष्णवानां सुसम्मतः । मदाश्रयकथासक्तो ममोत्सवरतःसदा ॥
कृपासिन्धुः सुपूर्णार्थः सर्वसत्त्वोपकारकः ।
निःस्पृहः सर्वतः सिद्धःसर्वविद्याविशारदः ॥ २६ ॥
सर्वसंशयसंछेत्ताऽनलसो गुरुराहृतः । ब्राह्मणः सर्वकालज्ञः कुर्यात्सर्वेष्वनुग्रहम् ॥
पूर्वोक्तलक्षणैर्युक्तः शिष्यईदृग्विधाद्गुरोः । गृह्णीयात्पुत्र! तन्मन्त्रं मार्गशीर्षे मदायने
वैष्णवानाम्व्रतानाञ्चकुर्यात्स्वीकरणम्बुधः । मत्प्रियंशृणुयाच्छश्वच्छ्रीमद्भागवतंपरम्
श्रीमद्भागवतंनाम पुराणंलोकविश्रुतम् । शृणुयाच्छ्रद्धया युक्तो मम सन्तोषकारणम्
नित्यं भागवतं यस्तु पुराणम्पठते नरः । प्रत्यक्षरम्भवेत्तस्य कपिलादानजम्फलम् ॥
श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठते शृणुयाद्यस्तुगोसहस्रफलंलभेत्
यः पठेत्प्रयतो नित्यं श्लोकं भागवतं सुत !। अष्टादशपुराणानां फलमाप्नोति मानवः
नित्यं मम कथा यत्र तत्र तिष्ठन्तिवैष्णवाः । कलिबाह्यानरास्ते वैयेऽर्चयन्तिसदामम
वैष्णवानां तु शास्त्राणियेऽर्चयन्तिगृहेनराः । सर्वपापविनिर्मुक्ताभवन्ति सुरवन्दिताः
येऽर्चयन्ति गृहे नित्यं शास्त्रं भागवतं कलौ ।
आस्फोटयन्ति वल्गन्ति तेषाम्प्रीतो भवाम्यहम् ॥ ३६ ॥
यावद्दिनानि हे पुत्र ! शास्त्रं भागवतं गृहे । तावत्पिबन्तिपितरःक्षीरंसर्पिर्मधुदकम् ॥
यच्छन्ति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये ।
कल्पकोटिसहस्राणि मम लोके वसन्ति ते ॥ ३८ ॥
येऽर्चयन्ति सदा गेहेशास्त्रंभागवतं नराः । प्रीणितास्तैश्चविबुधायावदाऽऽभूतम्प्लवम्
श्लोकार्धंश्लोकपादम्वा वरं भागवतं गृहे । शतशोऽथसहस्रैश्चकिमन्यैःशास्त्रसङ्ग्रहैः
न यस्य तिष्ठते शास्त्रं गृहे भागवतं कलौ । न तस्य पुनरावृत्तिर्याम्यपाशात्कदाचन
कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ । गृहेनतिष्ठतेयस्यश्वपचादधिकोहिसः
सर्वस्वेनाऽपि लोकेश! कर्तव्यः शास्त्रसंग्रहः । वैष्णवस्तुसदाभक्त्यातुष्ट्यर्थंममपुत्रक

यत्रयत्र भवेत्पुण्यं शास्त्रं भागवतं कलौ । तत्रतत्रसदैवाऽहं भवामि त्रिदशैः सह
तत्र सर्वाणि तीर्थानि नदीनदसरांसि च ।
यज्ञाः सप्तपुरी नित्यं पुण्याः सर्वे शिलोच्चयाः ॥ ४५ ॥
श्रोतव्यं मम शास्त्रं हि यशोधर्मजयार्थिना । पापक्षयार्थं लोकेश!मोक्षार्थं धर्मबुद्धिना
श्रीमद्भागवतं पुण्यमायुरारोग्यपुष्टिदम् । पठनाच्छ्रवणाद्वाऽपिसर्वपापैः प्रमुच्यते ॥
न शृण्वन्ति न हृष्यन्ति श्रीमद्भागवतं परम् ।
सत्यं सत्यं हि लोकेश तेषां स्वामी सदा यमः ॥ ४८ ॥
न गच्छति यदा मर्त्यःश्रोतुंभागवतंसुत !। एकादश्यांविशेषेणनाऽस्तिपापरतस्ततः
श्लोकंभागवतञ्चाऽपिश्लोकार्धंपादमेववा । लिखितन्तिष्ठतेयस्यगृहेतस्यवसाम्यहम्
नवाऽऽश्रमाऽभिगमनं सर्वतीर्थाऽवगाहनम् । नतथा पावनं नृणां श्रीमद्भागवतं यथा
यत्रयत्र चतुर्वक्त्र!श्रीमद्भागवतं भवेत् । गच्छामि तत्रतत्राऽहं गौर्यथा सुतवत्सला॥
मत्कथावाचकं नित्यं मत्कथाश्रवणे रतम् । मत्कथाप्रीतमनसंनाऽहंत्यक्ष्यामितंनरम्
श्रीमद्भागवतं पुण्यं दृष्ट्वा नोत्तिष्ठते हि यः । साम्वत्सरंतस्यपुण्यं विलयंयातिपुत्रक
श्रीमद्भागवतंदृष्ट्वा प्रत्युत्थानाभिवादनैः । सम्मानयेत तं दृष्ट्वा भवेत्प्रीतिर्ममाऽतुला ॥
दृष्ट्वाभागवतं दूरात्प्रक्रमेत्सम्मुखं हि यः । पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥
उत्थायप्रणमेद्यो वै श्रीमद्भागवतं नरः । धनं पुत्रांस्तथा दारान्भक्तिञ्च प्रददाम्यहम् ॥
महाराजोपचारैस्तु श्रीमद्भागवतंसुत !। शृण्वन्ति ये नराभक्त्यातेषांवश्योभवाम्यहम्
ममोत्सवेषु सर्वेषु श्रीमद्भागवतम्परम् । शृण्वन्ति ये नरा भक्त्या मम प्रीत्यैचसुव्रत
वस्त्रालङ्करणैः पुष्पैर्धूपदीपोपहारकैः । वशीकृतोह्यहं तैश्च सत्स्त्रिया सत्पतिर्यथा ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे मार्गशीर्षमासमाहात्म्ये ब्रह्मविष्णुसम्वादे भागवतश्रैष्ठ्यमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

मथुरामाहात्म्यवर्णनम्

ब्रह्मोवाच

कस्मिन्क्षेत्रे हिदेवेशमार्गशीर्षोऽधिकःस्मृतः। किं फलश्चभवेत्तस्मिन्नेतत्सर्वंवदप्रभो

श्रीभगवानुवाच

मथुरेतिसुविख्यातमस्ति क्षेत्रम्परं मम। सुरम्याच प्रशस्ता चजन्मभूमिः प्रियामम
पदेपदे तीर्थफलं मथुरायाश्चतुर्मुख !। यत्रयत्र नरः स्नातो मुच्यते घोरकिल्बिषात् ॥
सर्वधर्मविहीनानां पुरुषाणां दुरात्मनाम्। नरकार्तिहरा पुत्र! मथुरा पापनाशिनी ॥४
कृतघ्नश्च सुरापश्च चौरोभग्नव्रतस्तथा। मथुरां प्राप्य मनुजोमुच्यते घोरपातकात् ॥
सूर्योदये तमो नश्येद्यथा वज्रभयान्नगाः। तार्क्ष्यंदृष्ट्वा यथा सर्पा मेघा वातहता यथा
तत्त्वज्ञानाद्यथा दुःखं हरिं दृष्ट्वा यथा गजाः। तथा पापानिन श्यन्तिमथुरादर्शनात्सुत
श्रद्धया भक्तियुक्तस्तु दृष्ट्वा मधुपुरीं नरः। ब्रह्महाऽपि विशुध्येतकिंपुनस्त्वन्यपातकी
मथुरांस्नातुकामस्य गच्छतस्तु पदेपदे। निराशानि व्रजन्त्येव पापानि च शरीरतः ॥
अनुषङ्गेण गच्छन्ति वाणिज्येनाऽपिसेवया। मथुरास्नानमात्रेणदिवंयान्तिगतांहसः
नामाऽपि गृह्णतामस्याः सदा मुक्तिर्न संशयः। सदाकृतयुगं तत्र सदाचैवोत्तरायणम्

यः श्रृणोति चतुर्वक्त्र! माथुरं मम मन्दिरम्।
अन्येनोच्चारिते सद्यः सोऽपि पापात्प्रमुच्यते ॥ १२ ॥

त्रिरात्रमपि ये तत्र वसन्ति मनुजाः सुत !। तेषां पुनन्तिसंदृष्टाः स्पृष्टाश्चरणरेणवः
यथा तृणसमूहं तु ज्वलयन्ति स्फुलिङ्गकाः। तथामहान्ति पापानिदहते मथुरा पुरी
स्नानेन सर्वतीर्थानां यः स्यात्सुकृतसञ्चये। ततोऽधिकतरं प्रोक्तामथुरासर्वमण्डले
चतुर्णामपि वेदानां पुण्यमध्ययनाच्चयत्। तत्पुण्यं जायतेतत्रमथुरांस्मरतां नृणाम्
अन्यत्र हि कृतं पापं तीर्थमासाद्य नश्यति। तीर्थेषु यत्कृतंपापं वज्रलेपो भविष्यति

मथुरायां कृतं पापं मथुरायां प्रणश्यति। धर्मार्थकाममोक्षाख्यंस्थित्वा तत्र लभेन्नरः
अन्यत्र दशभिर्वर्षैः प्रारब्धं भुज्यते हि यत्। किल्बिषं चचतुर्वक्त्रमाथुरेदशभिर्दिनैः
दिविनैव न पाताले नान्तरिक्षे न मानुषे। समं तु मथुरायां हि प्रियं मम सदैव हि
सर्वेषामेव तीर्थानां माथुरं परमं महत्। बालक्रीडनरूपाणि कृतानि सह गोपकैः ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च। यत्फलं भारतेवर्षे तत्फलं मथुरां स्मरन् ॥
सन्निहत्यां तु यत्पुण्यं राहुग्रस्ते दिवाकरे। ततोऽधिकंलभेत्पुत्र! मथुरायांदिनेदिने
पूर्णेवर्षसहस्रे तु तीर्थराजे तु यत्फलम्। तत्फलं लभते पुत्र सहोमासे मधोः पुरे ॥
पूर्णेवर्षसहस्रे तु वाराणस्याञ्च यत्फलम्। तत्फलं लभते पुत्र मथुरायां सहोदिने

गोदावरीद्वारकयोर्नरो यः क्षेत्रे कुरूणां क्षितिदायको यः।
षण्मासकात्साधयते गयायां समं भवेन्नो दिनमेकमाथुरम् ॥ २६ ॥
न द्वारका काशिकाञ्ची न माया गदाधरो यस्य समं न तीर्थम्।
सन्तर्पिता यद्यमुनाजलेन वाञ्छन्ति नो वै पितरः पिण्डदानम् ॥ २७ ॥

मथुरायां प्रकुर्वन्तिपुरीसाधारणीदृशम्। येनरास्तेऽपिविज्ञेयाःपापराशिभिरन्विताः
न दृष्टा मथुरा येन दिदृक्षा यस्य जायते। यत्र तत्र मृतस्याऽपि माथुरेजन्म जायते

भूमे रजांसि गणयेत्कालेनाऽपि चतुर्मुख !।
माथुरे यानि तीर्थानि तेषां सङ्ख्या न विद्यते ॥ ३०

कुरु भोः कुरु भो वासंमथुराख्यांपुरींप्रति। वसामिसततंतस्यांगोपकन्याभिरावृतः
रेरेसंसारमग्नाश्च शिष्यामे श्रृणुताऽपरे। यदीच्छथसुखंसान्द्रं वासं कुरुत मत्पुरीम्
अहोलोको महानन्धो नेत्रयुक्तो न पश्यति। माथुरेविद्यमानेऽपिसंसृतिं भजते सदा
मानुषीं योनिमतुलां लब्ध्वा भाग्यस्य योगतः। वृथैवायुर्गतंतेषांन दृष्टा मथुरापुरी
अहो मतेः सुदौर्बल्यमहोभाग्यस्य दुर्विधिः। अहोमोहस्य महिमा मथुरानैवसेव्यते
मथुरां तु परित्यज्य योऽन्यत्र कुरुतेमतिम्। मूढोभ्रमतिसंसारेमोहितोमममायया

मथुरामपि सम्प्राप्य योऽन्यत्र कुरुते स्पृहाम्।
दुर्बुद्धिस्तस्यकिंज्ञानंसोऽज्ञानेन विजृम्भितः ॥ ३७ ॥

मात्रा पित्रा परित्यक्ता ये त्यक्ता निजबन्धुभिः ।
येषां क्वाऽपि गतिर्नास्ति तेषां मम पुरी गतिः ॥ ३८ ॥
पापराशिभिराक्रान्ता ये दारिद्र्यपराजिताः ।
येषां क्वाऽपि गतिर्नास्ति तेषां मम पुरी गतिः ॥ ३९ ॥

सारात्सारतरं स्थानं गुह्याद्गुह्यतरम्परम् । गतिमन्वेषमाणानां मथुरा परमा गतिः
न तत्पुण्यैर्नतद्दानैर्नतपोभिर्न तु स्तवैः । न लभ्यं विविधैर्योगैर्लभ्यं मदनुभावतः ॥
मयि येषां स्थिराभक्तिर्भूयसी येषुमत्कृपा । तेषामेव हि धन्यानांमथुरायांभवेद्गतिः
या गतिर्योगयुक्तस्य ब्रह्मज्ञस्य मनीषिणः । सागतिस्त्यजतःप्राणान्मथुरायांनरस्यच

काश्यादिपुर्यो यदि सन्ति लोके तासां तु मध्ये मथुरैव धन्या ।
या जन्ममौञ्जीव्रतमुक्तिदानैर्नृणां चतुर्धा विदधाति मुक्तिम् ॥ ४४ ॥

न योगैर्या गतिर्लभ्या मन्वन्तरशतैरपि । अन्यत्र हेलया साऽत्र लभ्यतेमत्प्रसादतः
न पापेभ्यो भयं यत्र न भयं यत्र वै यमात् । न गर्भवासभीर्यत्र तत्क्षेत्रंकोनसंश्रयेत्
मथुरायाञ्च यत्पुण्यं तत्पुण्यस्य फलं शृणु । मथुरायां समासाद्य मथुरायांमृताहिये

अपि कीटपतङ्गाद्या जायन्ते ते चतुर्भुजाः ।
कूलात्पतन्ति येवृक्षास्तेऽपि यान्ति परां गतिम् ॥ ४८ ॥

मूका जडान्धबधिरास्तपोनियमवर्जिताः । कालेनैव मृता ये च ममलोकंव्रजन्तिते
सर्पदष्टाः पशुहताः पावकाम्बुविनाशिताः । लब्धाऽपमृत्यवोये च माथुरेममलोकगाः
सत्यं सत्यं मुनिश्रेष्ठ! ब्रुवे शपथपूर्वकम् । सर्वाभीष्टप्रदं नान्यन्मथुरायाः समंकचित्

त्रिवर्गदा कामिनां या मुमुक्षूणां च मुक्तिदा ।
भक्तीच्छोर्भक्तिदा कस्तां मथुरां नाऽऽश्रयेद्बुधः ॥ ५२ ॥

एतादृशी मधुपुरी कर्त्तव्या मार्गशीर्षके । तदभावे पुष्करं हि कर्तव्यं विधिपूर्वकम्

ज्येष्ठं हि ब्रह्मणः कुण्डं मध्यं कुण्डञ्च वैष्णवम् ।
कनिष्ठं रुद्रदैवत्यमिति जानीहि बुद्धिमन् !॥ ५४ ॥

एषु स्नानञ्च दानञ्च श्राद्धञ्च विधिपूर्वकम् । पूजा च महती कार्याममप्रीतिकरासुत !

पूर्णा या तु भवेत्पुत्र सहोमासे मम प्रिया । तस्यांयत्क्रियतेपुण्यंममप्रीतिकरंभवेत्
गोदानमन्नदानञ्च हेमदानञ्च पुत्रक! । धरादानञ्च कर्तव्यं पूर्णायां विधिपूर्वकम् ॥५७
सहोमासे हि पूर्णायां सन्नदानञ्चकारयेत् । यत्किञ्चित्क्रियतेपूर्णंतदक्षय्यफलंभवेत्
ब्रह्मभोज्यं हि कर्तव्यं यथाविभवसारतः । पूर्णायामेव कर्तव्य उत्सवो व्रतपूर्त्तये ॥
यादृशी मथुरापुत्र! सहोमासे ममप्रिया । न तथा तीर्थराजाद्यास्तदभावे च पुष्करम्
पुष्करे मथुरायां वै पूर्णा कार्याविचक्षणैः । यत्रकुत्रापिवाकार्याविधियुक्ताचपूर्णिमा
स्नानं दानं तथा पूजां पूर्णायां न करोति यः । षष्टिवर्षसहस्राणि पच्यतेरौरवादिषु
तस्मात्सर्वप्रयत्नेन मान्या पूर्णा विचक्षणैः । मार्गशीर्षेणसंयुक्ताअनन्तफलदायिनी

यथा मे कथितं वत्स! मार्गशीर्षं मम प्रियम् ।
करोति यो नरोभक्त्या तस्य पुण्यफलं शृणु ॥ ६४ ॥

तीर्थायुतेषुयत्पुण्यंयत्पुण्यंव्रतकोटिभिः । सर्वयज्ञेषुयत्पुण्यं तत्पुण्यं समवाप्नुयात्
अपुत्रो लभतेपुत्रं निर्धनो धनमेव च । विद्यार्थी च तथा विद्यांरूपार्थीरूपमाप्नुयात्

ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो विजयी भवेत् ।
वैश्यो निधिपतित्वञ्च शूद्रः शुद्ध्येत पातकात् ॥ ६७ ॥

यद्दुर्लभञ्च दुष्प्राप्यं त्रिषुलोकेषु मानद !। तत्सर्वंप्राप्नुयान्मर्त्यः सहोमासेनसंशयः
यद्यप्येतेषु कामेषु सक्ता ये मानवाः सुत !। तुष्टाह्यन्ते चतुर्वक्त्र! नकामाहा महाभुज
सुदुर्लभा हिसद्भक्तिर्मम वश्यकराशुभा । सा वै सम्प्राप्यते पुत्र सहोमासे श्रुते तथा
ममप्रीतिकरं मासं सर्वदामम वल्लभम् । सर्वं सम्प्राप्यतेऽमुष्मान्मत्प्रसादाच्चतुर्मुख!

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
मार्गशीर्षमासमाहात्म्ये ब्रह्मविष्णुसम्वादे मथुरामाहात्म्यवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

समाप्तमिदंमार्गशीर्षमासमाहात्म्यम्